**श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत विश्वविद्यालय:**

**समेकित: शास्त्री / स्नातक:, डिग्री-आचार्य:/ स्नातकोत्तरीय: डिग्री कार्यक्रम:, 2022 वर्षीय: नियन्त्रक: विनियम:**

**विनियमक्रमाङ्क: 04**

**[केन्द्रीयसंस्कृतविश्वविद्यालयीय: अधिनियम:, 2020 वर्षीय: परिनियम: 40 (ii) इत्यनेन साकं पठितस्य परिनियमस्य 29 (1) इत्यस्य अन्तर्गतम्]**

*विषयसूची*


| क्र. सं. | विवरणम् | पृष्ठ सं. |
|---|---|---|
| 1 | प्रस्तावना उद्देश्य: च | 5-6 |
| 2 | शीर्षकं प्रारम्भ: च | 6 |
| 3 | परिभाषा: | 6-8 |
| 4 | समेकितस्नातक-स्नातकोत्तरयो: डिग्री'ति कार्यक्रमस्य संरचना | 8-9 |
| 5 | अध्ययनस्य कार्यक्रमाणां उपक्रमा: | 9-10 |
| 6 | समेकित-स्नातक-स्नातकोत्तरयो: डिग्री'ति कार्यक्रमस्य प्रवेश-क्षमता | 10 |
| 7 | क्रेडिट इति श्रेयसंरचना समेकित: स्नातक-स्नातकोत्तरयो:डिग्री'ति कार्यक्रम: | 10-11 |
| 8 | क्रेडिट इति सञ्चय: प्रतिदानञ्च | 11 |
| 9 | प्रवेशहेतु: प्रक्रिया: | 11 |
| 10 | समेकित-स्नातक-स्नातकोत्तरयो: कार्यक्रमेषु प्रवेशार्थम् समर्हता | 11-12 |
| 11 | पञ्जीकरणं नामाङ्कनञ्च | 12 |
| 12 | कार्यक्रमेषु पाठ्यक्रमेषु वा परिवर्तनम् | 12 |
| 13 | अनुदेशस्य माध्यमा: अनुदेशस्य विधा च | 12-13 |
| 14 | पार्श्व-प्रवेशस्य निकासस्य च विकल्प: | 13 |
| 15 | आकलनं मूल्याङ्कनञ्च | 13-14 |
| 16 | ग्रेडिंग इति श्रेणीनिर्धारणप्रणाली | 14 |
| 17 | डिग्रीत्यस्य / मानाङ्कनस्य/ स्वर्णपदकस्य वा पुरस्कार: | 14-15 |
| 18 | सीमावधि: | 15 |

| | | |
|---|---|---|
| 19 | निरसनं संशोधनञ्च | 15 |
| 20 | सुरक्षाखण्डः | 15 |
| 21 | अनुलग्नकम् -I | 16-17 |
| 22 | अनुलग्नकम् -II | 18 |

## *संक्षिप्ताक्षराणि*

| क्र. सं. | संक्षिप्तरूपाणि | संक्षिप्ताक्षराणां पूर्णरूपाणि |
|---|---|---|
| 1 | यूजीसी | विश्वविद्यालयानुदानायोग: |
| 2 | एनईपी-2020 | राष्ट्रियशिक्षानीति: 2020 |
| 3 | एमई-एमई | एकाधिकप्रवेश: - एकाधिकनिकास: |
| 4 | एसएलबीएसएनए सयू | श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालय: |
| 5 | जीपीए | श्रेणीबिन्दुमध्यमम् |
| 6 | एसजीपीए | सत्रीयं श्रेणीबिन्दुमध्यमम् |
| 7 | सीजीपीए | सञ्चयिश्रेणीबिन्दुमध्यमम् |
| 8 | एचईआई | उच्चशिक्षासंस्थानम् |
| 9 | यूजी | पूर्वस्नातक: |
| 10 | पीजी | स्नातकोत्तर: |
| 11 | एबीसी | अकादमिक बैंक ऑफ क्रेडिट |
| 12 | शिक्षा मंत्रालय | शिक्षामन्त्रालय: |
| 13 | जीओआई | भारतसर्वकार: |
| 14 | एनटीए | राष्ट्रियपरीक्षणाभिकरणम् |
| 15 | बीओएस | (अध्ययन बोर्ड) अध्ययनमण्डलम् |
| 16 | एचओडी | विभागाध्यक्ष: |
| 17 | आईए | आन्तरिकमूल्याङ्कनम् |
| 18 | ईएसई | सत्रान्ते परीक्षा: |
| 19 | एनएचईक्यूएफ | राष्ट्रियोच्चशिक्षायोग्यताप्रारूपम् |
| 20 | एनएसक्यूएफ | राष्ट्रियकौशलयोग्यताप्रारूपम् |
| 21 | एनसीआरएफ | राष्ट्रिय क्रेडिट रूपरेखा |

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयेन दिनांक 6.11.2020 तम्यां तिथौ समायोजिते निज-विद्या-परिषद: द्वितीये समुपवेशने संकल्पसंख्या 211 इत्यस्याः माध्यमेन 2020 तमवर्षीयाया: राष्ट्रियशिक्षानीते: (एनईपी-2020) कार्यान्वयनं अक्षरश: स्वीकर्तुं संकल्प: कृत:। कार्यपरिषदा संकल्पसंख्याया: 3.3 इत्यस्याः माध्यमेन 13.11.2020 तमे दिनाङ्के समनुष्ठिते स्वकीये तृतीये समुपवेशने विद्यापरिषद: उक्त प्रस्ताव: पुष्टीकृतः आसीत्। तदनुसारं, 'समेकितस्य शास्त्री/बैचलर डिग्रीत्यस्य नियन्त्रक-विनियमनम् - 2022 तम-वर्षीयस्य आचार्य-स्नातकोत्तर डिग्रीति कार्यक्रमस्य उद्देश्य: 2020 तम-वर्षीयाया: राष्ट्रिय-शिक्षा-नीते: विभिन्न-पक्षाणां, छात्राणां प्रवेशस्य, शिक्षणस्य, अधिगस्मस्य, मूल्याङ्कनस्य डिग्रीति प्रमाणपत्रप्रदानस्य चेत्येतेषां प्रक्रियाणां प्रबन्धनम् अस्ति।

विंशत्युत्तर-द्वि-सहस्र-तमाब्दीयायां राष्ट्रिय-शिक्षा-नीतौ व्यावसायिक पाठ्यक्रमै: सहितेषु बहु-विषयक-सन्दर्भेषु अध्ययनार्थम् अनुशासनात्मक क्षेत्राणां रचनात्मक-संयोजनस्य सक्षमीकरणार्थं सरल-नमनीय पाठ्यचर्या-संरचनानां परिकल्पना विधीयते । एतस्मिन् भूरि प्रवेशानां निकासानां च बिन्दुभि: सह पुन: प्रवेशस्य विकल्पानामपि परिकल्पना: विहिता: सन्ति, येन जीवन-पर्यन्तं अधिगमस्य नवला: संभावना: समुद्भवन्ति। बहु-विषयक-क्षेत्रेषु अध्ययनस्य शास्त्रीति स्नातकस्तरीय:, आचार्य: इति स्नातकोत्तर-स्तरीय: विद्यावारिधि: इति डॉक्टरेट कार्यक्रमेषु गहनानुसन्धानाधारित-विशेषज्ञता-प्रदानेन सह, शिक्षा-समाज-उद्योगै: सहितानां बहु-विषयकानां कार्याणाम् अवसरा: प्रदास्यन्ते । प्रचितेषु मुख्येषु अनुशासनात्मकेषु क्षेत्रेषु अध्ययनेषु, कार्येषु / व्यवसायेषु व्यावसायिकेषु अभ्यास-क्षेत्रेषु च गहन-विशेषज्ञताम् अतिरिच्य, पाठ्यक्रमेषु नमनीयतया साकं नूतनाकर्षक-पाठ्यक्रमाणां विकल्प: छात्रेभ्य: सम्प्रस्तोष्यते। पाठ्यक्रम-निर्धारणे संकायानां विर्धिताभि: संख्याभि: संस्थागत-स्वायत्तताभिश्च अस्य विवर्धनं भविष्यति। शिक्षाशास्त्रे सञ्चार-चर्चा-परिसंवाद-अनुसंधान-अन्तर-विषयक-अन्तःविषयक-चिन्तनानां विचार-विमर्शानां च अवसरेषु अधिकं प्राबल्यं प्रदास्यते।

एवं प्रकारेण समग्र-शिक्षायाः बहु-विषयक-शिक्षायाश्च प्राप्तये, समेषाम् एच.ई.आई. इत्येतेषां नमनीय-नवीन-पाठ्यक्रमे शास्त्राणां,मानविकी-विज्ञानस्य, सामाजिक-विज्ञानस्य, योगस्य, कौशलशिक्षाया:, पर्यावरणशिक्षाया:, मूल्याधारित-शिक्षाया: च क्षेत्रेषु क्रेडिट इत्याधारिता: पाठ्यक्रमा: परियोजना: च सम्मिलिताः भविष्यन्ति। पर्यावरण-शिक्षायां जलवायु-परिवर्तनं, प्रदूषणम्, अपशिष्ट-प्रबन्धनम्, स्वच्छता, सतत-विकास: जीवनयापनञ्चेति विविधानि क्षेत्राणि समाविष्टानि भविष्यन्ति। मूल्याधारित-शिक्षायां सत्य-धार्मिकाचरण-शान्ति-प्रेम-अहिंसा, नागरिकता-मूल्य-जीवन-कौशलै: साकं मानवतावादस्य, नैतिकताया:, संवैधानिक-सार्वभौमिक-मानवीय-मूल्यानां विकास: समाविष्ट: भविष्यति। सेवाप्रकल्पे पाठ: सामुदायिक-सेवा-कार्यक्रमेषु च सहभागिता समग्र-शिक्षाया: एकम् अभिन्नम् अङ्गम् अभिस्वीकरिष्यते। वैश्विक-नागरिकता-शिक्षायै सतत-विकासार्थं च शिक्षया विद्यार्थि-जनेभ्यः वैश्विक-विषयाणां सतत-विकास-प्रकरणानां च विषये जागरूकीभवितुं, तद् विषयं बोद्धुम् अधिक-शान्तिपूर्ण-सहिष्णु-समावेशि-सुरक्षित-

स्थायि-समाजस्य सक्रियतया प्रवर्तकीभवितुं सशक्तीकर्तुं च पाठ्यक्रमस्य एकम् अभिन्नम् अङ्गम् विधास्यते। समग्र-शिक्षाया: भाग-रूपे सर्वेषु एच.ई.आई. इति प्रकल्पेषु छात्रेभ्य: स्थानीय-निकायै: साकम् इंटर्नशिप इति परियोजनाकार्यादिभि: सममेव स्वकीयस्य उत वा अन्य एच.ई.आई. इत्यनुसन्धान-संस्थानेषु संकायै: शोधकर्तृभि: च साकम् अनुसन्धान-इंटर्नशिप इत्यस्य अवसरा: अपि प्रदास्यन्ते, येन छात्रा: सक्रिय-रूपेण निजाधिगमस्य व्यावहारिक-पक्षेण साकं संयोजिता: भवेयुः, अथ च उप-उत्पादस्य रूपेण स्वीयजिविकाया: क्षमतायां परिष्कारं कर्तुं शक्नुयुः।

प्रारूपम् -राष्ट्रियोच्च-शिक्षा-योग्यता-रूपरेखायां एन.एच.ई.क्यू.एफ. इत्यस्मिन् अधिगमस्य प्राप्यमाणानां निर्दिष्ट-स्तरणां कृते मानदण्डानाम् एकस्या: व्यवस्थाया: अनुसारेण वर्गीकरणं प्रदास्यते, अनेन माध्यमेन प्रत्येकमपि शिक्षाणां प्रशिक्षणानां च क्षेत्राणां समर्हणीयताया: एक: व्यापक-समर्हता-रूपरेखायां समेकित: समन्वयित: च विधास्यते।

एन.ई.पी-2020 इत्यस्य भावना: अनुसृत्य एस.एल.बी.एस.एन.एस.यू. इत्यनेन शास्त्राणां, मानविकीविज्ञानस्य, सामाजिकविज्ञानस्य, योगस्य शिक्षादिषु च विभिन्नेषु विषयेषु "समेकितस्य शास्त्री/बैचलरइति डिग्री-आचार्य: /स्नातकोत्तर डिग्री प्रोग्राम" इति कार्यक्रमाणां प्रदानविषये विचार: विधीयमान: वर्तते। **"समेकितानां शास्त्री/बैचलर डिग्री-आचार्य/स्नातकोत्तर डिग्री प्रोग्राम इति कार्यक्रमाणां 2022 तम-वर्षस्य नियन्त्रक-विनियम:"** विश्वविद्यालयस्य सम्बद्ध-विभाग-द्वारा समुपस्थापयिष्यमाणानां प्रोक्त-कार्यक्रमाणां कृते एकां रूपरेखां प्रदातुम् अर्हति। अनेन संयोजितानां तदानुषंगिक-प्रकरणानां च समाधानार्थं च रूपरेखा सुसज्जिता अस्ति।.

## 1. शीर्षकम् प्रारम्भश्च

विनियमा: **"समेकितस्य शास्त्रीति स्नातकस्य डिग्रीति-आचार्यस्य/स्नातकोत्तरस्य 2022 तमवर्षस्य पाठ्यकार्यक्रमस्य नियन्त्रक-विनियमा:"** कथयिष्यते।

एते विनियमा: विश्वविद्यालयस्य कार्यपरिषद्द्वारा अनुमोदनस्य तिथित: विश्वविद्यालयद्वारा प्रसारिताया: अधिसूचनाया: दिनाङ्कत: प्रभावम् आयस्यन्ति।

## 2. परिभाषा:

2.1 "विश्वविद्यालयस्य" अर्थ: अस्ति श्रीलालबहादुर-शास्त्रि-राष्ट्रिय संस्कृत-विश्वविद्यालय:, नवीना दिल्ली।

2.2 "विद्या परिषद्" इत्यस्या: अभिप्रायम् श्रीलालबहादुर-शास्त्रि-राष्ट्रिय संस्कृत-विश्वविद्यालयस्य विद्यापरिषद् अस्ति।

2.3 "कार्य परिषद्" इत्येतस्या: अर्थ: श्रीलालबहादुर-शास्त्रि-राष्ट्रिय संस्कृत-विश्वविद्यालयस्य कार्यपरिषदस्ति।

2.4 "बीओएस" इत्येतस्य अर्थ: अस्ति विभागानाम् अध्ययनमण्डलम्।

2.5 "पीठ मण्डलम्" इत्येतस्य अभिप्रेतमस्ति कस्यचिद् पीठस्य पीठ-मण्डलम्। (बोर्ड)।

2.6 "पीठम्" इत्येतस्य अभिप्रेतमस्ति विश्वविद्यालयस्य विभिन्नानि पीठानि।

2.7 "विभागस्य" तात्पर्यम् विश्वविद्यालयस्य विभिन्नै: विभागै: भवति।

2.8 "कार्यक्रमस्य" अर्थ: अस्ति विश्वविद्यालयानुदानायोगाधिनियम, 1956 (1956 तमवर्षस्यv3) इत्यस्य धारा 22 इत्येतस्या: उप-धारा (3) इत्यतन्तर्गतं विश्वविद्यालयानुदानायोगद्वारा निर्दिष्टस्य कस्यचिद् विशेषस्य डिग्रीति पुरस्कारस्य कृते विश्वविद्यालय-द्वारा निर्धारित पाठ्यक्रमाणां एका व्यवस्था।

2.9 "अनुशासनम्" इत्यस्य अभिप्रायम् अस्ति शास्त्रम्, सामाजिक विज्ञानम्, मानविकी, योग:, शिक्षा चेत्यादय:।

2.10 "विषयस्य" अर्थ: अस्ति शास्त्रम्, सामाजिक-विज्ञानम्, मानविकी-शास्त्रम्, योग: शिक्षा चेत्यादीनां केषामपि अनुशासने अध्ययनस्य क्षेत्रम्, प्रत्येकमपि अध्ययन-पीठस्य अन्तर्गतम् एक: विषयॊ वर्तते ।

2.11 "पाठ्यक्रमस्य" अभिप्रेतं भवति निर्दिष्ट-एकांश युत: विषय:।

2.12 "क्रेडिट" इत्येतस्य अर्थ: एक: एतादृश: एकांश: अस्ति यस्मिन् प्रस्तावितस्य पाठ्यक्रमस्य मूल्यस्य, स्तरस्य, समयस्य वा आवश्यकतानां महत्त्वं प्रदीयते।

2.13 "शुल्कस्य" तात्पर्यम् विश्वविद्यालय-द्वारा निर्धारितं शुल्कम् अस्ति।

2.14 "सतत मूल्यांकनमिति" (सीए) इत्यस्य अर्थ: अस्ति विनियमानाम् अनुसारेण छात्रेभ्य: विषय-शिक्षक-द्वारा सत्रस्य अवसरे एकस्य विशेष-पाठ्यक्रमस्य अन्तर्गतम् आयोजितं निरन्तरं मूल्याङ्कनम्।

2.15 "सैमेस्टर" इत्यस्य अर्थ: अस्ति एकस्मिन् शैक्षणिके वर्षे षण्णां मासानम् अवधे: शैक्षणिकी समय-सीमा, यदन्तर्गतं सामान्यतः 90 कार्यदिवसा: भवन्ति।

2.16 "सैमेस्टर इति सत्रस्य अन्ते परीक्षा" (ईएसई) इत्येतस्य अर्थ: पाठ्यक्रमस्य सम्पूर्ते: अनन्तरं विशेषत: सैमेस्टर इति सत्रस्य अन्ते आयोक्ष्यमाणा परीक्षा।

2.17 "स्नातक-प्रमाणपत्रम्" इत्येतस्य अर्थ: अस्ति स्नातकमिति डिग्री (शास्त्री/बी.ए. योग) कार्यक्रमस्य एकवर्षीय: (प्रथमवर्षस्य - सत्रद्वयम्)।

2.18 "स्नातक पूर्व डिप्लोमा" इत्येतस्य अर्थ: भवति स्नातकस्य डिग्री (शास्त्री/बी.ए. योग) कार्यक्रमस्य द्वैवार्षिकम् (प्रथमस्य वर्षद्वयस्य आद्यं सत्रचतुष्टयम्)।

2.19 "स्नातक डिग्री" इत्येतस्य अर्थ: अस्ति विश्वविद्यालय-द्वारा प्रस्तावितस्य त्रैवार्षिकस्य ( प्रथम,-त्रि-वर्ष-स्नातकीयस्य डिग्रीति कार्यक्रमस्य प्रारम्भिकं सत्र-षट्कम् (शास्त्री/बी.ए. योग:)।

2.20 "ऑनर्स/रिसर्च इति सम्मानितदृशा अनुसन्धानदृशा च साकं बैचलर डिग्री" इत्यस्य अभिप्रेतम् अस्ति विश्वविद्यालय-द्वारा प्रस्तावितस्य चतुर्वर्षीय: (अष्ट-सत्रात्मक:) स्नातकस्य डिग्रीति (शास्त्री/बी.ए. योग) कार्यक्रम:।

2.21 "स्नातकोत्तर डिप्लोमा" इत्येतस्य अर्थः तेषां जनानां प्रकरणे स्नातकोत्तर- डिग्रीति कार्यक्रमस्य एकं वर्षम् (सत्रद्वयम्) अस्ति, ये द्वि-वर्षीयस्य आचार्यस्य/स्नातकोत्तर-कार्यक्रमस्य उत वा पञ्च वर्षीयस्य (दशसत्रात्मकस्य) समेकितस्य स्नातक-स्नातकोत्तर डिग्री कार्यक्रमस्य प्रथम-वर्षीयं (सत्र-द्वयं) सफलतापूर्वकं सम्पूर्य सुसज्जाः समर्हाः भवन्ति।

2.22 "स्नातकोत्तरस्य डिग्री" इत्यस्य अर्थो विद्यते द्वि-वर्षीयः (चतुस्सत्रात्मकः) स्नातकोत्तरीयः डिग्रीति कार्यक्रमः, एषः कार्यक्रमः तेभ्यः जनेभ्यः भवति यैः आचार्यस्य /कला स्नातकोत्तरस्य (योगस्य, हिन्द्याः, हिन्दू अध्ययनस्य, समाजशास्त्रस्य, आङ्ग्लस्य, शिक्षायाः चेत्यादीनां) त्रि-वर्षीयं (षट् सत्रात्मकम्) स्नातकद्य प्रमाणपत्रम् अधिगतम् अस्ति, अथ च तेभ्यः जनेभ्यः अपि यैः एक-वर्षीयं (सत्र-द्वयात्मकम्) यैश्च चतुर्-वर्षीयं (अष्ट-सत्रात्मकं ) स्नातकीयं (मानदं/अनुसन्धानपरं) डिग्रीति प्रमाण-पत्रम् प्राप्तमस्ति।

2.23 "छात्रस्य" अर्थः - सः छात्रः अस्ति यस्य नामाङ्कनम् उपरिप्रतिपादितस्य पञ्च-वर्षीयस्य समेकित-कार्यक्रमस्य कृते विहितम् अस्ति।

2.24 "शैक्षणिक वर्षम्" इत्येतस्य अर्थः वर्तते निरन्तरम् सत्र-द्वयस्य योजनम्।

2.25 "ग्रेड पॉइंट" 10-पॉइंट स्केल इत्यत्र प्रत्येकमपि ग्रेड कृते समर्पितम् अक्षरम् एक-संख्यात्मकः भाराङ्कः अस्ति।

2.26 "क्रेडिट प्वाइंट" इति कस्मिंश्चिद् विशेष-पाठ्यक्रमे ग्रेड प्वाइंट इत्यस्य क्रेडिट इत्यस्य च संख्यायाः उत्पादः वर्तते।

2.27 "अक्षर ग्रेड" कस्मिंश्चिद् प्रोक्ते विशेष-पाठ्यक्रमे छात्राणां प्रदर्शनस्य एकः सूचकाङ्कः अस्ति।

2.28 "ग्रेड" इत्येतत् O, A+, A, B+, B, C, P, अथ च F इत्यस्य द्वारा प्रदर्श्यते।

2.29 "सैमेस्टर ग्रेड प्वाइंट माध्यमाकलनम्" (एसजीपीए) इति एकस्मिन् सत्रे विहितस्य कार्यस्य प्रदर्शनस्य एकः मापदण्डः वर्तते। एतद् एकस्मिन् सत्रे पञ्जीकृतेषु विभिन्नेषु पाठ्यक्रमेषु एक-छात्र-द्वारा प्राप्तानाम् आहत्य क्रेडिट इत्यङ्कानां तस्य सत्रस्यावसरे अभिस्वीकृतस्य समग्र-पाठ्यक्रमस्य क्रेडिट इत्येतस्य अनुपातः अस्ति। एतद् हि दशम-लवस्य स्थान-द्वयं यावद् अभिव्यक्तं करिष्यते।

2.30 "संचयी ग्रेड प्वाइंट औसत" (सीजीपीए) इत्येतत् सञ्चयिश्रेणी निर्धारण-माध्यमम् एकस्य कार्यक्रमस्य सर्वेषु सत्रेषु एकस्य छात्रस्य समग्र-सञ्चयि-प्रदर्शनस्य मापनम् अस्ति। सीजीपीए इति सर्वेषु सत्रेषु विभिन्नेषु पाठ्यक्रमेषु एक-छात्र-द्वारा प्राप्तानां समग्राणां क्रेडिट इत्यङ्कानाम् अनुपातः अस्ति। अपि च सर्वेषु सत्रेषु सर्वेषां पाठ्यक्रमाणां समग्राणां क्रेडिट इत्यङ्कानां योगः अस्ति । एतदपि दशमलव-द्वयस्य स्थानं यावत् व्यक्तीक्रियते ।

## 3. समेकितस्य शास्त्रीत्यस्य/स्नातकस्य डिग्री - आचार्यस्य/स्नातकोत्तरस्य च डिग्री कार्यक्रमस्य संरचना :

3.1 डिग्रीति कार्यक्रमः एमई-एमई इत्येतयोः विकल्पेन साकम् एकस्यां सैमेस्टर इति सत्रीयायां योजनायां संरचयिष्यते।

3.2 न्यूनतमैः (40) चत्वारिंशन्मितैः क्रेडिट इत्यङ्कैः साकं स्नातक-पूर्वशास्त्री/बी.ए योगः चेति कार्यक्रमस्य प्रथमवर्षस्य ( सत्र-द्वयस्य) अनन्तरं तत्परेभ्यः छात्रेभ्यः स्नातक-प्रमाणपत्रम् (अधिगमस्य/अनुशासनस्य च क्षेत्रे)।

3.3 न्यूनतमैः (80) अशीतिमितैः क्रेडिट इत्यङ्कैः साकं स्नातकस्य (शास्त्री/बी.ए.) कार्यक्रमस्य प्रथमे वर्षद्वये (सत्रचतुष्कस्य) पश्चात् स्नातकाध्यायन-निरतेभ्यः स्नातक-पूर्व-डिप्लोमा इति (अधिगमस्य/अनुशासनस्य च क्षेत्रयोः)।

3.4 न्यूनतमैः (120) विंशत्युत्तरैक-शत-मितैः क्रेडिट इत्यङ्कैः साकं बेचलर डिग्री (शास्त्री/बी.ए. योगश्चेति) वर्षत्रयस्य अवधौ, अथ वा सत्र-षट्कस्य कार्यक्रमः)।

3.5 न्यूनतमैः (120):विंशत्युत्तरैक-शत-मितैः क्रेडिट इत्यङ्कैः साकं स्नातक-पूर्व-कार्यक्रमस्य वर्षत्रयस्य (सत्र-षट्कस्य) अनन्तरं सुतरां समुद्यतेभ्यः बैचलर ऑफ वोकेशन (बी.वोक) इति व्यवसाय-स्नातकः ।

3.6 न्यूनतमैः (160) षष्ट्युत्तरैक-शत-मितैः क्रेडिट इत्यङ्कैः साकं बैचलर डिग्री (ऑनर्स/रिसर्च) शास्त्री/ चेति वर्षचतुष्टयस्य अवधौ अष्ट-सत्रात्मकस्य बी.ए योग-कार्यक्रमः।

3.7 द्वि-वर्षीयस्य आचार्य/स्नातकोत्तर-कार्यक्रमस्य प्रथम-वर्षस्य (सत्रद्वयस्य) सफलतापूर्वकं सम्पूर्तेः अनन्तरं सुसज्जितेभ्यः न्यूनतमैः (40) चत्वारिंशन्मितैः क्रेडिट इत्यङ्कैः साकं स्नातकोत्तरस्य डिप्लोमा-कार्यक्रमः।

3.8 स्नातकोत्तरस्य डिग्री (आचार्यस्य/ एम.ए. योगस्य, हिन्दी, हिन्दू अध्ययनस्य, समाजशास्त्रस्य, अङ्ग्लस्य चेति वर्ष-द्वयस्य अवधौ अथवा त्रि-वर्षावधौ षट्सु सत्रेषु शास्त्रीत्यस्य/ स्नातकस्य डिग्री प्राप्तेरनन्तरं न्यूनतमैः (80) अशीतिमितैः क्रेडिट इत्यङ्कैः साकं चतुर्णां सत्राणां कार्यक्रमः।

3.9 वर्ष-चतुष्टयस्य उत अष्टसत्रात्मकस्य शास्त्रीत्यस्य/बैचलर डिग्री (ऑनर्स/रिसर्च) इत्येतस्य प्राप्तेः पश्चात् न्यूनतमैः (40) चत्वारिंशन्मितैः क्रेडिट इत्यङ्कैः साकं एक-वर्षस्य अवधौ उत वा सत्र-द्वयस्य स्नातकोत्तरस्य डिग्रीति (आचार्यस्य/एम.ए.) पाठ्यचर्या/कार्यक्रमः।

## 4. **अध्ययनस्य कार्यक्रममाणां घटकाः**

4.1 अध्ययनस्य पाठ्यक्रमस्य/कार्यक्रमस्य च विरचने निम्नप्रकारकानां पाठ्यक्रमानां/गतिविधीनां च उपयोगं कर्तुं शक्यते। एतेषु प्रत्येकमपि गतिविधीनाम् अवगमनस्य कस्यचिद् अपि प्रविधेः प्रयोगशालायाः/स्टूडियो इत्यस्य/ कार्यशाला-गतिविधीनां, क्षेत्र-आधारितस्य शिक्षणस्य/परियोजनानां इंटर्नशिप इति प्रशिक्षणस्य/सामुदायिक-सहभागितायाः सेवानां च क्षेत्रेषु विशिष्ट-संख्यायां शिक्षणस्य / मार्गदर्शनस्य च आवश्यकता भविष्यति।

- पाठिताः पाठ्यक्रमाः : एकस्मिन् सत्रे प्रति क्रेडिट अङ्कम् न्यूनतमम् (15) पञ्च-दश-होराणां शिक्षणेन साकं त्रिंशद् होराणां कक्षायाः बाह्यस्य कार्यप्रकल्पाः गतिविधयश्च

अङ्गत्वेन स्वीकरिष्यन्ते यथा - पाठितानां पाठ्यक्रमानां/पाठानां सुसज्जता, असाइनमेंट इति परियोजनानां प्रपूरणं यद्धि पाठ्यक्रम-कार्यस्य एक: भाग: वर्तते। अथ च स्वतन्त्र रूपेण पठनम् अध्ययनञ्चापि। क्रेडिट इत्यङ्कानां ग्रेडिंग इत्यस्य प्रयोजनेभ्य: कक्षाया: बाह्यस्य गतिविधीनां मापनं परिमाणबद्धञ्च नैव कर्तुं शक्यते।

-  प्रयोगशाला-कार्यकलापा:/स्टूडियो-कार्यकलापा/कार्यशाला कार्यकलापा:/ एकस्मिन् सत्रे प्रति क्रेडिट अङ्कम् न्यूनतमा(30) त्रिंशद्होरा प्रयोगशालासु / स्टूडियो / कार्यशालासु च गतिविधय:, अथ च पञ्चदश (15) होरा कक्षाया: बाह्यगतिविधय: यथा प्रायोगिकस्य तत्परता, असाइनमेंट इति परियोजना-सम्पूरणं स्वतन्त्र-पठनम् अध्ययनञ्च।
-  क्षेत्राधारितं शिक्षणम्/ परियोजनाकार्यम्, इंटर्नशिप/सामुदायिक संयोजनम् सेवा च : एकस्मिन् सत्रे न्यूनतमम् (30) त्रिंशत् होरामितम् अवगमनस्य अधिगमनस्य च गतिविधिभि: साकम् त्रिंशद्होराणां कक्षाया: बाह्य-क्रियाकलापा: यथा - क्षेत्रीय परियोजनानां सुसज्जता, प्रदत्त-कार्य-प्रपूरणम् चेति, यद्धि पाठ्यक्रम-कार्यस्य एकम् अङ्गम् अस्ति। अथ च स्वतन्त्र-पठनम् अध्ययनम् च ।

4.2 समेकितानां स्नातकीय-परास्नातकीय-कार्यक्रमेभ्य: पाठ्यक्रमस्य प्रारूप-रचना राष्ट्ररियोच्च-शिक्षा-योग्यता-रूपरेखायां (एनएचईक्यूएफ) इत्यस्मिन् आधारिता भविष्यति। अथ च एतेषु पाठ्यक्रम-अधिगम-परिणाम: (सीएलओ) इति, कार्यक्रम-शिक्षणस्य परिणाम: (पीएलओ), चेत्यादिभि: साकं विभिन्न-स्ततेषु अपेक्षित-स्नातक-विशेषता: प्रतिबिम्बिता: भविष्यन्ति।

4.3 विश्वविद्यालयस्य सर्वे पाठ्यक्रमा: / कार्यक्रमा: यद्धि एनईपी-2020तम-वर्षीय-राष्ट्रियशिक्षानीते: अनुसारेण, तेषां पाठ्यक्रमेषु / पाठ्यचर्यासु निम्नलिखिता: घटका: भविष्यन्ति:

(i) मुख्यपाठ्यक्रम: (ii) विभाग-विशिष्ट-वैकल्पिक: पाठ्यक्रम:; / सामान्य-वैकल्पिक: पाठ्यक्रम:; (iii) कौशल-संवर्धन-पाठ्यक्रम; (iv) योग्यता-संवर्धन-पाठ्यक्रम:; मूल्य-वर्धित-पाठ्यक्रम: (डीएसई) चेति। एतासु पाठ्यचर्यासु शास्त्रै:, भाषाभि:, मूल्य-शिक्षाभि: क्रियाकलापाधारित-पाठ्यक्रमै: सह सम्बद्ध-पाठ्यक्रमेभ्य: चापि उचितं महत्त्वं प्रदेयं भविष्यति।

4.4 सर्वे पाठ्यक्रमा:/कार्यक्रमा: ये खलु अनेन विनियमेन अभिशासिता: जायन्ते, तै: विनिमयै: छात्रा: स्वयमेव विश्वविद्यालयानुदानायोग-द्वारा अन्य-सक्षम-निकाय-द्वारा च मान्यता-प्राप्तानाम् अन्यान्तार्जालीयमञ्चानां (एम.ओ.ओ.सी.) च माध्यमेन ऑनलाइन इति अन्तर्जालीय-पाठ्यक्रमाणां प्रचयनस्य विकल्प: सम्प्रदास्यते । बी.ओ.एस. इति द्वारा कस्मैचिद् विशेषानुशासनार्थं प्रदत्ताया: अनुशंसाया: आधारेण आहत्य समग्राणां क्रेडिट इत्यङ्कानां विश्वविद्यालयानुदानायोगस्य विनियमानाम् अनुसारेण छात्राणां द्वारा अन्तर्जालीय-पाठ्यक्रमाणां प्रचयनं करिष्यते। यद्यपि, पात्रता, अवधि:, क्रेडिट आवश्यकता, विधिय:, विकल्प:, क्रेडिट इत्यस्य स्वीकार्यता चेत्येतेषां प्रभावार्थं अन्तर्जालीय-पाठ्यक्रमा: विनियमै: अर्थात् (एम.ओ.ओ.सी.)' इति द्वारा नियन्त्रिता: भविष्यन्ति।

4.5 छात्रेभ्य: कस्मिंश्चित् विशिष्टे डिग्रीत्याख्ये कार्यक्रमे प्रदत्तान् अनिवार्यान् क्रेडिट इत्यङ्कान् अतिरिच्य अन्तरनुशासनात्मक पाठ्यक्रमाणां माध्यमेन अतिरिक्तानां क्रेडिट इत्यङ्कानाम् अर्जनस्य सौविध्यं सम्प्रदातुं शक्यते।

## 5 समेकितस्य शास्त्रीति/स्नातकस्य डिग्रीति-आचार्यस्य/स्नातकोत्तरस्य डिग्री कार्यक्रमस्य प्रवेश-क्षमता :

5.1 प्रवेश-क्षमता विश्वविद्यालयद्वारा प्रस्तावितेभ्य: समेकितेभ्य: शास्त्री/स्नातक-आचार्य/स् नातकोत्तराणां डिग्रीति कार्यक्रमेभ्य: तदाशयार्थं स्थापिताया: प्रक्रियाया: माध्यमेन समये समये निर्धारयिष्यते।

5.2 प्रवेश-क्षमता समेकित: शास्त्री/स्नातक-आचार्य/स्नातकोत्तराणां डिग्रीति कार्यक्रम: संगत-मूल-संरचनानां शिक्षकाणां च उपलब्धताया: आधारे निर्धारयिष्यते।

## 6 क्रेडिट इति संरचना-समेकित: शास्त्री/स्नातक डिग्री-आचार्य/स् नातकोत्तराणां डिग्रीति कार्यक्रम: :

6.1 उपरिप्रतिपादितस्य डिग्रीति कार्यक्रमस्य कृते क्रेडिट इति व्यवस्थां समेकित: शास्त्री/स्नातक-आचार्य/स्नातकोत्तराणां कार्यक्रम: प्रणाली वा शिक्षक-केन्द्रितं न विधाय छात्र-केन्द्रितं विधातुम् अभिस्वीकृत: अस्ति । एवं प्रकारेण, मुख्य-प्रश्नपत्राणां/पाठ्यक्रमाणां, वैकल्पिकानां प्रश्नपत्राणां च माध्यमेन एकस्मिन् अनुशासने समर्पितं केन्द्रम् अतिरिच्य, छात्रेभ्य: विभाग-विशिष्टा: वैकल्पिका: पाठ्यक्रमा: प्रदत्ता: सन्ति; सामान्य-वैकल्पिक-पाठ्यक्रमा:, कौशल-संवर्धन-पाठ्यक्रमा:, क्षमता-संवर्धन-पाठ्यक्रमा:, मूल्य-संवर्धित-पाठ्यक्रमा:, क्रियाकलापाधारित-पाठ्यक्रमा:, अनुसन्धान-परियोजना:, चेति विविधा: छात्राणामभिरुचे: अनुसारेण तदनुकूलानुशासनस्य तत्सम्बद्ध/अनुप्रयुक्त/व्यापक-क्षेत्राणां प्रचयनस्य स्वतन्त्रता छात्रैः सम्प्राप्स्यते।

6.2 पाठ्यक्रमाणां विस्तृता शृङ्खला (विभाग-विशिष्टस्य वैकल्पिक पाठ्यक्रमा:; सामान्य-वैकल्पिक-पाठ्यक्रमा:, कौशल-संवर्धन-पाठ्यक्रमा:, क्षमता-संवर्धन-पाठ्यक्रमा:, मूल्य-संवर्धित-पाठ्यक्रमाश्च) यद्धि पाठ्यक्रमाणां विशालसागरत्वेन उपलब्धा: भविष्यन्ति, छात्रेभ्य: स्वस्य कृते एक: क्रेडिट बास्केट इत्यस्य अङ्क-सङ्कलन-भाजनस्य सुसज्जीकरणस्य सौविध्यम् प्रदास्यते। छात्रा: जीवने स्वीय-महत्वाकांक्षानाम् प्रपूर्तये कॅरिअर इति जीवनवृत्तित्वेन यादृशं स्वरूपं प्रदातुमीहन्ते, तदनुसारं ते स्वीय-पाठ्यक्रम-भाजनस्य चयनं निर्माणम्/ प्रारूपणं च कर्तुम् अर्हन्ति।

6.3 समेकितस्य शास्त्री/स्नातक-आचार्य/स्नातकोत्तराणां कार्यक्रमस्य सत्रानुसारं क्रेडिट इति संरचनाया: योग्यताया: शीर्षकीकरणेन/नामकरणेन च साकं योग्यताया: प्रकार: एतेषां विनियमकानां अनुलग्नक-I इत्यस्य अनुसारेण भविष्यति। शास्त्र-मानविकी-सामाजिकविज्ञान-योग-शिक्षा-प्रभृतीनाम् सर्वेषु विभागेषु विश्वविद्यालया-नुदानायोगस्य/एन.सी.टी.ई.

इत्यस्य/विश्वविद्यालयस्य/शिक्षामन्त्रालयस्य च विनियमानां अनुसारेण अनुलग्नक-I इत्येतस्मिन् उल्लेखितायाः निर्धारितायाः च क्रेडिट संरचनायाः अभिस्वीकरणस्य आवश्यकता अस्ति।

## 7 क्रेडिट इत्यङ्क-सञ्चयः प्रतिदानञ्च :

7.1 विश्वविद्यालयः एनईपी-2020 इति विंशत्युत्तर-द्वि-सहस्र-तमाब्दस्य राष्ट्रिय-शिक्षा-नीतेः प्रावधानस्य अनुसारेण स्नातक-स्ततेषु स्नातकोत्तर-स्तरेषु च छात्रेभ्यः एम.ई-एम.ई इत्यनेन सह पुनः प्रवेशस्य विकल्पानां सुविधायाः कृते राष्ट्रियोच्च-शिक्षा-योग्यता-रूपरेखायाः (एन.एच.ई.क्यू.एफ.) इत्यस्य अनुपालनं करिष्यति। अस्य प्रयोजनस्य कृते, विश्वविद्यालयः अकादमिक बैंक ऑफ क्रेडिट इति प्रारूपम्, अन्यसम्बद्धरूपरेखाञ्च अभिस्वीकर्तुं समये समये विश्वविद्यालयानुदानायोगेन/ शिक्षा-मन्त्रालयेन च विरचितानां दिङ्निर्देशानाम् अनुपालनं करिष्यति।

## 8 प्रवेशस्य प्रक्रिया :

8.1 विश्वविद्यालयस्य एनईपी-2020 इति विंशत्युत्तर-द्वि-सहस्र-तमाब्दस्य राष्ट्रिय-शिक्षा-नीतेः अनुसारेण सर्वेषु डिग्रीति कार्यक्रमेषु प्रवेशः विश्वविद्यालयः अथवा भारतसर्वकारस्य/विश्वविद्यालयानुदानायोगस्य/विश्वविद्यालयस्य द्वारा अभिज्ञातैः अभिकरणैः (एन.टी.ए.) द्वारा अखिल-भारतीयाधारे आयोजित-प्रवेश-परीक्षा-माध्यमेन करिष्यते।

8.2 उक्त-प्रवेश-परीक्षायां सहभागीभूताः प्रत्याशिनः विश्वविद्यालयस्य नियमानाम् अनुसारेण प्रवेश-परीक्षायां प्राप्ताङ्कानाम् आधारेण 'योग्यता-क्रमेण' तेषु तेषु पाठ्यक्रमेषु प्रवेशार्हाः भविष्यन्ति।

8.3 प्रवेशे आरक्षणं समये समये भार-तप्रशासनस्य/शिक्षा-मन्त्रालयस्य /विश्वविद्यालयानुदानायोगस्य दिङ्निर्देशानाम् अनुसारेण प्रदास्यते।

8.4 'शैक्षणिक-वर्षस्य' प्रारम्भस्य तिथिः विश्वविद्यालय-द्वारा निर्धारयिष्यते। विश्वविद्यालयः अस्य आशयस्य एकं 'शैक्षणिकं कालन्धरं' अधिसूचितं करिष्यति, यस्मिन् विषम-सम-सत्राणाम् मध्ये कार्य-दिवसानाम् अवधेः समग्र-संख्यानां विवरणं भविष्यति।

8.5 विभागाः स्व-सम्बद्ध-डिग्रीति कार्यक्रमेभ्यः प्रत्येकेषु शैक्षणिकेषु वर्षेषु विशेष-विभागेभ्यः विश्वविद्यालय-द्वारा घोषित-प्रवेश-क्षमता-तः अधिक-छात्राणां प्रवेशं नैव स्वीकरिष्यति।

## 9 समेकितेषु शास्त्री/स्नातक डिग्री-आचार्य/स्नातकोत्तराणां डिग्रीति कार्यक्रमेषु प्रवेशार्थं पात्रता :

9.1 एकः छात्रः येन संगतानुशासने प्रतिशतं (४०) चत्वारिंशन्मिताङ्कैः साकं 10+2 इति उत वा समकक्षीया परीक्षा उत्तीर्णा अस्ति, तस्य छात्रस्य विश्वविद्यालयानुदानायोगस्य/एन.सी.टी.ई. इत्यस्य//विश्वविद्यालयस्य भारत-सर्वकारस्य

च कस्यापि अन्य-संगत-शैक्षणिक-वैधानिक-निकायस्य द्वारा निर्धारिते 'समेकिते शास्त्री/बैचलर-आचार्य /स्नातकोत्तराणां डिग्रीति कार्यक्रमे' प्रवेशस्य समर्हता भविष्यति।

9.2 विश्वविद्यालय-द्वारा प्रवेश-परीक्षायां सहभागितार्थं विभिन्न विषयेषु/पाठ्यक्रमेषु च प्रवेशार्थं समर्हा: अङ्का: निर्धारिता: विधास्यन्ते। विभिन्न-श्रेणीनाम् आवश्यकताकुलेभ्य: प्रत्याशिभ्य: 'योग्यताङ्के' शैथिल्यं, समये समये भारत-सर्वकारस्य/शिक्षा मन्त्रालयस्य /विश्वविद्यालयानुदानायोगस्य/एन.सी.टी.ई. इत्यस्य च दिङ्निर्देशानाम् अनुसारेण सम्प्रदास्यते।

## 10 पञ्जीकरणं नामाङ्कनञ्च :

10.1 विभिन्नानुशासनेषु/पाठ्यक्रमेषु प्रवेशेच्छुकेभ्य: सर्वेभ्य: छात्रेभ्य: विश्वविद्यालयस्य शैक्षणिक-शाखा-द्वारा एका नामाङ्कन-संख्या प्रदास्यते। एषा नामाङ्कन-संख्या "अन्तिम-प्रपत्रादीनां सत्यापनस्य" सम्पन्नानन्तरं प्रदास्यते। एवं प्रकारेण प्रदत्ता नामाङ्कन-संख्या भविष्यस्य सर्वेषु उद्देश्येषु "छात्रस्याभिज्ञानार्थं" विशिष्टा संगता च भविष्यति।

10.2 विभिन्न-विषयेषु लब्धप्रेवेशै: प्रत्येकमपि छात्रै: आगामि-सत्रस्य पाठ्यक्रमार्थं पञ्जीकरणं विधेयं भविष्यति (विभाग-विशिष्टे ऐच्छिक-सामान्यैच्छिक-योग्यतावृद्धि-अनिवार्यपाठ्यक्रम-कौशल-वृद्धिपाठ्यक्रम-मूल्यसंवर्धित-पाठ्यक्रमै: विश्वविद्यालयद्वारा निर्धारितै: अन्यैः च पाठ्यक्रमै: सहितम्)।

10.3 प्रत्येकमपि सत्रस्य प्रारम्भे छात्रद्वारा विभिन्न-पाठ्यक्रमाणां चयने मार्गदर्शनार्थं/ परामर्श-प्रदानार्थं च मेंटर-मेंटी इति प्रणाली प्रारब्धा भविष्यति।

10.4 विश्वविद्यालय-द्वारा प्रथम-सत्रस्य सम्पूर्ते: अनन्तरं परिणामस्य च घोषणाया: पश्चाद् आगाम्युच्चतर-सत्रे पञ्जीकरणस्य कृते अधिसूचना प्रसारयिष्यते। इमानि सर्वाणि पञ्जीकरणानि छात्रै: निर्धारितेषु प्रारूपेषु ऑनलाइन पोर्टल इति अन्तर्जालीयफलके/ऑफलाइन इति पद्धतौ वा विश्वविद्यालय-द्वारा विनिश्चिते अवधौ प्रपूरयितव्यानि भविष्यन्ति तथा विश्वविद्यालयस्य वेब फलके विधिवदेव अधिसूचितानि करिष्यन्ते।

## 11 कार्यक्रमेषु/पाठ्यक्रमेषु परिवर्तनम्:

11.1 **कार्यक्रमे परिवर्तनम्** : ये छात्रा: स्वीयं पाठ्यक्रमं/कार्यक्रमं वा परिवर्तितुम् ईहन्ते, तेभ्य: प्रवेशस्य दिनाङ्कत: सप्ताह-चतुष्टयस्य अवधे: अन्तर्गतम् विभाग-प्रमुखाय लिखित-रूपे आवेदनस्य अनुमतिं प्रदातुं शक्यते। एतत् पत्रम् अग्रे कार्यान्वयनार्थं तत्प्रक्रियायै विश्वविद्यालयस्य अकादमिक-प्रभागाय प्रेषयिष्यते।

11.2 **पाठ्यक्रमे परिवर्तनम् :** कस्मिंश्चिद् पाठ्यक्रमे/कार्यक्रमे लब्धप्रवेशा: छात्रा: सत्रारम्भ-तिथि-त: सप्ताह द्वयाभ्यान्तरस्य अवधौ विभागस्य प्रमुखाय लिखित-रूपेण पाठ्यक्रमे

परिवर्तनार्थम् आवेदयितुम् अर्हन्ति। एतेभ्य: छात्रेभ्य: निज-प्रचिते पाठ्यक्रमे उपस्थिते: न्यूनतमम् आवश्यकं प्रतिशतं पूरयितुं अन्तिम-गणनाया: प्रयोजनार्थं विगत-पाठ्यक्रमस्य समग्रोपस्थिते: संख्या अग्रे वर्धनस्य पात्रता भविष्यति।

## 12 अनुदेशस्य माध्यमम् अनुदेशस्य प्रकारश्च:

12.1 शिक्षाया: माध्यमम् विश्वविद्यालयस्य अध्यादेशे परिभाषितस्य अनुसारेण भविष्यति। यद्यपि, विभिन्नानाम् भाषाणां विभागेषु पाठ्यक्रमेभ्य: अनुदेशानां माध्यमम् सम्बद्धा भाषा भविष्यति।

12.2 अध्यापन-अधिगम-विधौ सामान्य-रूपेण विभागानां बी.ओ.एस. इति द्वारा निर्दिष्टा: निम्नलिखिता: उपक्रमा: सम्मिलिताः भविष्यन्ति : (i) व्याख्यानम् (ii) ट्यूटोरियल इति अनुशिक्षणम् (iii) समूहचर्चा (iv) फील्ड इति क्षेत्रकार्यम् (v) औद्योगिकी यात्रा(vi) अध्ययन यात्रा (vi) परियोजनाकार्यम् (vii) सङ्गोष्ठी (सेमिनार) (viii) टेक होम असाइनमेंट इति परियोजना: (ix) इंटर्नशिप इति प्रशिक्षणम् (x) प्रकरणाध् ययनम् विभागाय पाठ्यक्रमाय वा विशिष्ट: कश्चिद् अन्यविधि:, यादृशम् अपि प्रकरणं भवेत्।

## 13 पार्श्व-प्रवेश: निकास-विकल्पश्च

13.1 एस.एल.बी.एस.एन.एस.यू. इत्यस्मिन् श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालये छात्राणां बाह्य-छात्राणां च कृते पार्श्व-प्रवेश: निम्नलिखितेषु मानदण्डेषु आधारित: भविष्यति (i) छात्रै: क्रेडिट इत्यङ्कानाम् आवश्यकता पूरणीया भविष्यति, यद्धि विगत-स्तरं यावत् पूरणम् आवश्यकनास्ति। (उदाहरणम्: सप्तमे स्तरे पार्श्व-प्रवेशेच्छुकेन छात्रेण तस्मिन्नेव कार्यक्रमे (80) अशीति: क्रेडिट इत्यङ्क-मूल्यस्य पाठ्यक्रम: पूरयितव्य: भविष्यति। एतस्मिन् षष्ठ-स्तर-पर्यन्तस्य विभागस्य कोर इति मुख्येभ्य: वैकल्पिकेभ्यश्च पाठ्यक्रमेभ्य: निर्धारिता: समग्रा: क्रेडिट इत्यङ्का: समाविष्टा: भविष्यन्ति)।

13.2 एतेषु कस्मिन्नपि स्तरे डिग्रीति कार्यक्रमे सर्वेषां पार्श्व-प्रवेशानां पात्रता-मानदण्ड: **उपर्युक्त**स्य 13.1 इति खण्डस्य आवश्यकतानाम् सम्पूर्ते:; अथ च समये समये विश्वविद्यालय-द्वारा निर्दिष्ट कस्याश्चिदन्यावश्यकताया: अधीने भविष्यन्ति।

13.3 संगत-सत्रे पार्श्वप्रवेशस्य कृते आसनानि विश्वविद्यालयद्वारा समये समये निर्धारिता: करिष्यन्ते।

13.4 निकास-विकल्प: केवलम् "सम सत्रस्य" अन्ते उपलब्धा: भविष्यन्ति किञ्च प्रवेशस्य विकल्प: केवलम् "विषम-सत्रस्य" प्रारम्भे एव उपलब्ध: भविष्यति, यश्च अन्य-संगत मानदण्डानां पूरणाधीन: भविष्यति ।

13.5 कस्मिंश्चिदपि "सम-सत्रस्य" अन्ते बहि: निस्सरणेच्छुकै: छात्रै:/छात्राभिश्च सत्रस्त सफल-समापनस्य अनन्तरं विभागस्य प्रमुखेण (एचओडी) साकं लिखित-रूपे अनुमति:

स्वीकर्तव्या भविष्यति। विभागाध्यक्ष: एतद् अनुमतिपत्रं विश्वविद्यालयस्य शैक्षणिक-प्रभागम्प्रति अग्रेषितं करिष्यति। शैक्षणिक-प्रभागस्य पक्षत: अस्मिन् प्रकरणे कर्यान्वयनं करिष्यते, सक्षम-प्राधिकारिण: अनुमते: प्राप्ते: पश्चात् प्रकरणम् इदं सूचनाया: अधिसूचनाया: च प्रयोजनार्थं परीक्षा-नियन्त्रकाय प्रेषयिष्यते।

## 14 आकलनं मूल्याङ्कनञ्च:

14.1 कस्मिन्नपि विषये मूल्याङ्कन-प्रसङ्गे द्वौ घटकौ सम्मिलितौ भविष्यत: - (i) सतताकलनम् (सीए) (ii) सत्रस्य अवसाने परीक्षा (ईएसई) चेति।

14.2 सतताकलनाय समाग्राङ्कानां प्रतिशतं (२०) विंशति-मित: भार: प्रदास्यते। अथ च अन्तिम-सत्र-परीक्षाभ्य: प्रतिशतं (८०) अशीतिः परिमित: भार: प्रदास्यते। सर्वेषु विषयेषु/पाठ्यक्रमेषु प्रत्येकमपि विषयस्य मूल्याङ्कनं , विषयेभ्य: आवण्टितान् समग्रान् क्रेडिट इत्यङ्कान् विहाय , सी.ए.-ई.एस.ई. इति घटकद्वयेन सहिते (100) एक-शत-मितानाम् अङ्कानाम् आधारे करिष्यते।

14.3 सतताकलने कक्षा-परीक्षा:, सङ्गोष्ठ्य:, प्रस्तुतीकरणम्, प्रकरणाध्यनम्, कार्यम्, क्षेत्रीयकार्यम्, परियोजना-कार्यम् चेत्यादीनि भविष्यन्ति सम्मिलितानि।

14.4 कक्षायां स्वीक्रियमाणा: परीक्षा: अधिमानतः एकहोरावधीनां भविष्यन्ति पाठ्यक्रम: शिक्षक-द्वारा आयोजयिष्यते निश्चेष्यते च।

14.5 सत्रस्यावसानस्य परीक्षाणां (ईएसई) न्यूनतमावधि: घण्टाद्वयस्य अधिकतमावधि: च घण्टात्रयस्य भविष्यति।

14.6 प्रायोगिक-परीक्षा: त्रि-होरा-त: चतुर्होरामितावधे: भवितुं प्रभवन्ति। अथ च सम्बद्ध-विभागस्य पाठ्यक्रमेण निर्धारिता: कर्तुं शक्यन्ते।

14.7 सी.ए., इत्यस्य ई.एस.ई. इत्यस्य च कमपि अन्यं विधिं/पद्धतिं/अवधिं वा विभागा: तेषां बी.ओ.एस. प्रकल्पा: च विधिवद् अनुमोदनस्य अनन्तरं विश्वविद्यालयस्य सम्बद्ध-वैधानिक निकाय-द्वारा एतस्य पुष्टे: पश्चाद् एव अभिस्वीकर्तुं शक्नुवन्ति। परिणामानां अभिलेखीकरणस्य प्रसंस्करणस्य च प्रयोजनार्थं एतद् परीक्षा-नियन्त्रकस्य कार्यालयेऽपि सूचनीयो भविष्यति।

14.8 न्यूनतमोपस्थिते: आवश्यकता : एकस्मै छात्राय सत्रान्त-परीक्षायाम् उपवेशनस्य सैविध्यं केवलं तदैव प्रदास्यते यदा तस्य उपस्थिति: न्यूनतमत्वेन प्रतिशतं (75%) पञ्चसप्तति-मिता भवेत् । उपस्थिते: नियमा: आकलनेन मूल्याङ्कनेन च सम्बद्धानुकूल-संगत-विनियमेषु अग्रे निर्धारयिष्यन्ते। अथ च तेनैव तस्य नियन्त्रणम् अपि करिष्यते।

14.9 आकलनस्य मूल्याङ्कनस्य चान्ये सर्वे पक्षा: विश्वविद्यालयस्य संगत-विनियम-द्वारा अभिशासिता: भविष्यन्ति।

## 15 ग्रेडिंग इति श्रेणीनिर्धारणप्रणाली :

15.1 विश्वविद्यालय: विनियमस्य अनुलग्नक-II इत्यस्मिन् निर्धारितां ग्रेडिंग इति श्रेणी-निर्धारण-प्रणालीम् आनुपालयिष्यति। ग्रेडिंग प्रणाल्या: सर्वै: प्रावधानै: पक्षैश्च सहितेषु अन्यविषयेषु, चापि यदि कश्चिद् विवाद: भवेत्, तर्हि: स: विवाद: आकलनेन मूल्याङ्कनेन च सम्बद्ध-विनियम-द्वारा अभिशासित: भविष्यति।

15.2 कस्मिन्नपि विषय-विशेषे केनापि छात्रेण प्राप्ता: समग्रा: अङ्का: अनुलग्नक- II इत्येतस्मिन् प्रदत्त-सूत्रस्य अनुसारेण ग्रेड प्वाइंट औसत (जी.पी.ए.) इति श्रेणी-निर्धारण-बिन्दु-माध्यमे परिवर्तिता: करिष्यन्ते। एकस्मिन् सत्रे एक-छात्र-द्वारा प्राप्ता: समग्रा: अङ्का: सैमेस्टर ग्रेड प्वाइंट औसत (एस.जी.पी.ए.) इति सत्रीय-श्रेणी-निर्धारण-बिन्दु-माध्यमे परिवर्तिता: विधास्यन्ते। डिग्रीति कार्यक्रमे छात्र-द्वारा प्राप्ता: समग्रा: अङ्का: (सी.जी.पी.ए.) इति सञ्चयि-श्रेणी-निर्धारण-बिन्दु-माध्यमे परिवर्तिता: करिष्यन्ते।

15.3 सूत्रसहितं ग्रेड स्केल इति श्रेणी-निर्धारण-पद्धति: द्वितीये अनुलग्नके प्रदत्ता अस्ति। कस्यापि छात्रस्य ग्रेड कार्ड इति श्रेणी-पत्रके केवलं जी.पी.ए., एस.जी.पी.ए., सी.जी.पी.ए. चेत्येव प्रदर्शयिष्यन्ते।

## 16 डिग्रीत्यस्य/मानाङ्नस्य/स्वर्णपदकानाञ्च पुरस्कार :

16.1 परीक्षा-नियन्त्रकस्य कार्यालय: एतदाशय-युक्त-विनियमानाम् अनुरूपं ग्रेड कार्ड इति लब्धाङ्क-श्रेणी-प्रमाणपत्रकं वितरिष्यति। एतादृशानि ग्रेड कार्ड इतिश्रेणी-प्रमाणपत्रकं/संगतं प्रमाणपत्रकं डिग्रीति श्रेणी-प्रमाणपत्रकाणि च सर्वेषां सम-सत्राणां सफल-समापने छात्रेभ्य: सम्प्रदास्यन्ते।

16.2 परीक्षा-नियन्त्रक-कार्यालये सी.जी.पी.ए. इत्यस्य गणना करिष्यते। तदा एकस्मिन् विशिष्टे डिग्रीति कार्यक्रमाभ्यन्तरे छात्र-द्वारा प्राप्त-श्रेण्या: अनुसारेण छात्राणां 'रैंक' इति मानाङ्कनं घोषयिष्यते। एतद् 'रैंक' इति मानाङ्कनं तस्मिन् विशिष्टे डिग्री कार्यक्रमे छात्राणां कक्षाया:/बैच इति गुल्मस्य आभ्यन्तरे घोषयिष्यते।

16.3 विभिन्नेषु पाठ्यक्रमेषु/डिग्रीति कार्यक्रमेषु स्वर्ण-पदक-वितरणस्य अभिशासनम् एतदाशय-युक्तस्य विश्वविद्यालयस्य विनियमनद्वारा करिष्यते।

## 17 परिसीमा अवधि :

17.1 कस्मिंश्चिदपि अनुशासने पञ्च-वर्षीये षड्-वर्षीये समेकिते कार्यक्रमे लब्धप्रवेशेन छात्रेण उक्त-पाठ्यक्रम: निर्धारित-नियमानुसारेण क्रमशः दश-सत्रेषु द्वादश सत्रेषु च सम्पूरणीय: भविष्यति। यतोहि, उक्त-कार्यक्रम: एम.ई.-एम.ई. इति नियमेषु आधारित: अस्ति।, अत

एव उक्त डिग्री कार्यक्रमे यदि कश्चिद् 'सीमावधि:' वर्तते चेत् , भारतसर्वकारेण/शिक्षा मन्त्रालयेन /विश्वविद्यालयानुदानायोगेन/एन.सी.टी.ई. द्वारा वा निर्धारितनियमानुसारेण नियन्त्रयिष्यते।

17.2 सत्राणाम् अवसरे कस्यचिदपि अन्यस्य नियम-शैथिल्यस्य निर्णय: विश्वविद्यालय-द्वारा एतदाशयेन घटित-समित्या करिष्यते। एतादृशानां प्रकरणानां निर्णय: आपत्कालिक-स्थितीनाम् आधारे करिष्यते। छात्र-द्वारा संगत-प्रपत्राणां साक्ष्यमपि प्रस्तोष्यन्ते।

## 18 **निरसनं संशोधनञ्च** :

18.1 एष: विनियम: अनेन विनियम-विषयेण सम्बद्धेषु सर्वेषु पूर्ववर्तिषु विनियम-स्थानेषु क्रियान्वित: भविष्यति।

18.2 विश्वविद्यालय: समये समये भारत-सर्वकारेण/शिक्षा-मन्त्रालयेन/एन.सी.टी.ई. इत्यनेन/विश्वविद्यालयानुदानायोगेन च प्रसारितानां दिङ्निर्देशानां मध्येदृशम् एतस्य विनियमनस्य कस्मिन्नपि प्रावधाने संशोधनं कर्तुं शक्नोति। एतादृशानि संशोधनानि 2020-तम-वर्षस्य अधिनियमस्य अनुसारेण केन्द्रीय-संस्कृत-विश्वविद्यालयस्य विभिन्न-वैधानिक-निकाय-द्वारा पारितानि/समाधेयानि/अभिस्वीकर्तव्यानि च भविष्यन्ति।

## 19 **सुरक्षाखण्ड:** :

19.1 विनियमनस्य अन्तर्गतं कस्यचिदपि स्खलनस्य आयोगस्य वा स्थिते: अनन्तरम् अपि , कुलपते: निर्णय: अन्तिम: भविष्यति।

19.2 एतस्मिन् विनियमे कस्यापि विषयस्य व्याख्या विश्वविद्यालयस्य अधिनियमस्य, विधिनियमानाम् अध्यादेशानां विश्वविद्यालयानुदानायोगस्य/एन.ई.टी.ई.इत्यस्य/शिक्षा-मन्त्रालस्य च निर्देशानां विपरीतं नैव कर्तुं शक्यते।

## अनुलग्नकम् - I

### शास्त्र-मानविकी-योग-सामाजिकविज्ञानेषु समेकितानां शास्त्री/स्नातक-आचार्य/स्नातकोत्तरीय-कार्यक्रमाणां क्रेडिट इति संरचना

| योग्यताया: प्रकार: | सत्रम् | एन.एच. एफ.क्यू. एफ. इति स्तर: | कार्यक्रम: | न्यूनतम क्रेडिट इत्यङ्कावश्यकता |
|---|---|---|---|---|
| स्नातकप्रमाणपत्रम् | I<br>II | स्तर: 5 | स्नातक-प्रमाणपत्रम् (अनुशासनम्)। (कार्यक्रमस्य अवधि: : स्नातक कार्यक्रमाणां प्रथमं वर्षम् (आद्यं सत्र द्वयम्), एतदनन्तरं न्यूनान्न्यूनं 6-क्रेडिट इत्यङ्कानां कार्यम् (जॉब)-विशिष्टा इंटर्नशिप इति सेवा/ परियोजनाकार्यम्/ प्रशिक्षुता यत्र स्नातकेभ्य: कार्यबले प्रवेशार्थम् आवश्यक-कार्यार्थं (जॉब) इति सेवार्थं दक्षताधिगमने साहाय्यम् अवाप्स्यते। | 40 |
| स्नातकीयं डिप्लोमा इत्याख्यं प्रमाणपत्रम् | III<br>IV | स्तर: 6 | स्नातकीयं डिप्लोमेति प्रमाणपत्रम्(अध्ययनस्य/अनुशासनस्य क्षेत्रम्)। (कार्यक्रमस्य अवधि: : स्नातक-कार्यक्रमाणां आद्यं वर्षद्वयं (आदिमं सत्र चतुष्टयम्), एतदनन्तरं न्यूनान्न्यूनं 6-क्रेडिट इत्यङ्कानां कार्यम् (जॉब)-विशिष्टा इंटर्नशिप इति सेवा/ परियोजनाकार्यम्/ प्रशिक्षुता यत्र स्नातकेभ्य: कार्यबले प्रवेशार्थम् आवश्यक-कार्यार्थं (जॉब) इति सेवार्थं दक्षताधिगमने साहाय्यम् अवाप्स्यते। | 80 |
| स्नातकीयं | V | स्तर: 7 | शास्त्री/बैचलर ऑफ आर्ट्स अर्थात् | 120 |

| | | | | |
|---|---|---|---|---|
| डिग्रीति प्रमाण पत्रम् | VI | | कलास्नातक:,(योग:)<br>(कार्यक्रमाणामवधि : स्नातक-कार्यक्रमाणां आद्यं वर्षत्रयम् (आदिमं सत्र-षट्कम्), एतदनन्तरं न्यूनान्न्यूनं 6-क्रेडिट इत्यङ्कानां कार्यम् (जॉब)-विशिष्टा इंटर्नशिप इति सेवा/ परियोजनाकार्यम्/ प्रशिक्षुता यत्र स्नातकेभ्य: कार्यबले प्रवेशार्थम् आवश्यक-कार्यार्थं (जॉब) इति सेवार्थं दक्षताधिगमने साहाय्यम् अवाप्स्यते।<br><br>उदाहरणम् :<br>• शास्त्री/बैचलर ऑफ आर्ट्स अर्थात् कलास्नातक:, (बी.ए.), बैचलर ऑफ एजुकेशन अर्थात् शिक्षाशात्री(बी.एड.), बैचलर ऑफ वोकेशनल स्टडीज अर्थात् व्यवसाय-स्नातक: (बी.वोक.), चेत्यादय: कार्यक्रमाः।<br>• कार्यक्रमाणाम् अवधि: : वर्षत्रयम् (सत्र-षट्कम्)। | |
| स्नातकीयं डिग्रीति प्रमाणपत्रम् (ऑनर्स/अनुसन्धानञ्च) | VII<br>VIII | स्तर: 8 | • शास्त्री/बैचलर ऑफ आर्ट्स, अर्थात् कलास्नातक: योग: (ऑनर्स/रिसर्च)।<br>कार्यक्रमस्य अवधि: : वर्ष-चतुष्कम् (सत्राणाम् अष्टकम्)। | 160 |
| स्नातकोत्तरीयं | I | स्तर: 8 | (सम्बद्धे अनुशासने) स्नातकोत्तरीयं | 40 |

| | | | | |
|---|---|---|---|---|
| डिप्लोमा इत्याख्यं प्रमाणपत्रम् | II | | डिप्लोमा इत्याख्यं प्रमाणपत्रम् । कार्यक्रमस्य अवधि: : द्वि-वर्षीयम् आचार्यस्य/स्नातकोत्तरस्य कार्यक्रमस्य प्रथमं वर्षम् ( सत्र-द्वयात्मकम् ) सफलतापूर्वकं सम्पूरितानां छात्राणां प्रकरणे एकवर्षम् (सत्र-द्वयात्मकम्), एतदनन्तरं न्यूनान्न्यूनं 6-क्रेडिट इत्यङ्कानां कार्यम् (जॉब)-विशिष्टा इंटर्नशिप इति सेवा/ परियोजनाकार्यम्/ प्रशिक्षुता यत्र स्नातकेभ्य: कार्यबले प्रवेशार्थम् आवश्यक-कार्यार्थं (जॉब) इति सेवार्थं दक्षताधिगमने साहाय्यम् अवाप्स्यते। | |
| स्नातकोत्तरीयं | III | स्तर: 9 | आचार्य: /मास्टर ऑफ आर्ट्स अर्थात् | 80 |

| | | | | |
|---|---|---|---|---|
| डिग्रीति प्रमाणपत्रम् | IV | | कला-परास्नातक: (सम्बद्धे अनुशासने)। कार्यक्रमस्य अवधि: : तेभ्य: जानेभ्य: वर्ष-द्वयम् (सत्रचतुष्टयम्), यै: त्रि-वर्षीयं/ षट्-सत्रात्मकं शास्त्रीत्यस्य/ स्नातकस्य डिग्रीति प्रमाणपत्रम् अधिगतम् अस्ति, उत वा तेषां जनानाम् प्रकरणे एक-वर्षम् (सत्र-द्वयात्मकम्), यै: चतुर्वर्षीयं/अष्ट सत्रात्मकं शास्त्रीत्यस्य/ स्नातकस्य (ऑनर्स/शोध:) चेत्यस्य डिग्रीति प्रमाणपत्रं प्राप्तम् अस्ति।<br>उदाहरणम्<br>• आचार्य:/मास्टर ऑफ आर्ट्स कला-परास्नातक: (एम.ए.),<br>• समेकित: शास्त्री/स्नातक-आचार्य/स्नातकोत्तरीय: डिग्रीति कार्यक्रम:। कार्यक्रमस्य अवधि: माध्यमिक-शिक्षाया: सम्पूर्ते: अनन्तरं पञ्च-वर्षीयम् (दश-सत्रात्मकम्)।<br>• त्रि-वर्षीयम्/ षट्-सत्रात्मकम् शास्त्रीत्यस्य/स्नातकस्य डिग्रीति पाठ्यक्रमस्य प्राप्ते: अनन्तरं द्वि-वर्षीयं (सत्र-चतुष्टयम्)।<br>• कार्यक्रमस्य अवधि: : शास्त्रीत्यस्य/स्नातकस्य डिग्रीत्यस्य प्राप्ते: अनन्तरं वर्षद्वयम् ( सत्र चतुष्टयम्)। | |

**अनुलग्नक -।।**

| ग्रेडिंग स्केल और फॉर्मूला | | | |
|---|---|---|---|
| **क्र. सं.** | **लैटर (अक्षराणि) ग्रेड इति श्रेणी** | **ग्रेड पॉइंट इति श्रेणीनिर्धारण बिन्दु:** | **टिप्पण्य:** |
| 1 | O | 10 | अद्भुतम् |
| 2 | A+ | 9 | उत्कृष्टम् |

| | | | |
|---|---|---|---|
| 3 | A | 8 | अति शोभनम् |
| 4 | B+ | 7 | शोभनम् |
| 5 | B | 6 | माध्यम-त: अधिकम् |
| 6 | C | 5 | माध्यमम् |
| 7 | D | 4 | उत्तीर्ण: |
| 8 | F | 0 | असफल: |
| 9 | Ab | 0 | अनुपस्थित: |

क्रेडिट इत्यङ्केतर-पाठ्यक्रमेषु अक्षर ग्रेड इत्यस्य स्थाने 'सन्तोषजनकम्' 'असन्तोषजनकम्' वा इति प्रदर्शयिष्यते। अथ चैतद् एस.जी.पी.ए./सी.जी.पी.ए. इत्यस्य गणनायां नैव गणयिष्यते। विश्वविद्यालय: संगत-मानक-व्यवस्थापन-निकायस्य अनुशंसा: निध्याय कस्मिन्नपि पाठ्यक्रमे उत्तीर्णतायै आवश्यकस्य ग्रेड इति श्रेणीनिर्धारणस्य अङ्कानां च प्रतिशततार्थं प्रमाणपत्रार्थं/डिप्लोमा इत्यर्थं/डिग्रीत्यर्थं चार्हताया: प्राप्तये आवश्यकस्य सी.जी.पी.ए. इत्यस्य विषये निर्णयं करिष्यति।

### एस.जी.पी.ए. सी.जी.पी.ए. चेत्यनयो: गणना

एस.जी.पी.ए./सी.जी.पी.ए. इत्यनयोः परिगणनार्थं निम्नलिखित-प्रक्रिया अनुपालयिष्यते।

i. **एस.जी.पी.ए. इति सत्रीयश्रेणीनिर्धारणबिन्दुमाध्यमम्**

एस.जी.पी.ए. इति एकेन छात्रेण सर्वेषु पाठ्यक्रमेषु कृतोत्पादस्य योगस्य एकछात्रद्वारा कृतानां समेषां पाठ्यक्रमाणां क्रेडिट इति संख्यानाञ्च अनुपात: अस्ति, अर्थात्।

एस.जी.पी.ए. (एस.आई.) =∑ (Ci x Gi /∑Ci

यत्र Ci, ith पाठ्यक्रमस्य क्रेडिट इति संख्या वर्तते Gi, ith पाठ्यक्रमे छात्रद्वारा प्राप्त: ग्रेड प्वाइंट इति श्रेणीनिर्धारणबिन्दु: अस्ति।

**ii. सीजीपीए इति सञ्चयिश्रेणीनिर्धारणबिन्दुमाध्यमम्**

सी.जी.पी.ए. इत्यस्य गणनापि तेनैव विधिना विधीयते, यत्र एकस्य कार्यक्रमस्य सर्वेषु सत्रेषु एक-छात्र-द्वारा विहितानां समेषां पाठ्यक्रमाणां ध्यानं दीयते, अर्थात्

एस.जी.पी.ए. = ∑( Ci x Si /∑C i

यत्र Si प्रथम सत्रस्य सी.जी.पी.ए. अस्ति तथा Ci तस्मिन्नेव सत्रे क्रेडिट इत्यङ्कानाम् आहत्य संख्या भवति।

iii. एस.जी.पी.ए. सी.जी.पी.ए. चेति उभयमपि दशमलवाङ्क-द्वयं यावत् पूर्णाङ्कितं करिष्यते, अथ च ट्रांसक्रिप्ट/ ग्रेड शीट इत्याख्ये श्रेणीनिर्धारक-प्रपत्रके संसूचयिष्यते।

## ग्रेड इति श्रेणीरूपान्तरणप्रारूपम्

एस.जी.पी.ए./सी.जी.पी.ए. इत्येतयोः प्रतिशतरूपेण अङ्केषु परिवर्तनार्थं दश-मितस्य गुणनस्य कारकस्य उपयोगं कर्तुं शक्यते।

**टिप्पणी** : स्वयमेव अथवा विश्वविद्यालयानुदानायोगस्य कस्यचिदन्यस्य सक्षम-निकायस्य द्वारा मान्यता-प्राप्तैः समरूपैः अन्तर्जालीय-मञ्च-माध्यमैः छात्र-द्वारा समर्जितानां क्रेडिट इत्यङ्कानाम् एतस्य विनियमनस्य (4.4) दशम-लवोत्तर-चतुरधिक-चतुर्मितस्य समाकलनस्य मूल्याङ्कनस्य च नियमे निर्धारितानाम् मानदण्डानां सम्पूरणे एस.जी.पी.ए. सी.जी.पी.ए. इत्येतयोः गणनार्थं स्वीकार्याः भविष्यन्ति।

*****

**श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत विश्वविद्यालयः**

**<u>विनियमसंख्या 5</u>**

## स्नातकस्तरस्य स्नातकोत्तरस्तरस्य च पाठ्यक्रमेषु अकादमिक (शैक्षिक) बैंक ऑफ क्रेडिट (ए.बी.सी.) इत्यस्य स्थापना सञ्चालनञ्च

विश्वविद्यालयानुदानायोगस्य एकविंशत्युत्तर-द्वि-सहस्र-तम-वर्षस्य जुलाई-मासस्य अष्टाविंश्यां तिथौ, प्रकाशिताया: राजपत्राधिसूचनाया: अनुसारेण, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालय:, नवीना दिल्ली वैधानिक-प्राधिकारिण: अनुमोदन-पुरस्सरम्, निम्नलिखितान् नियमान् रचयति :-

1. **संक्षिप्त-शीर्षकम्, अनुप्रयोग: प्रारम्भश्च-**
   (1) एते विनियमा: श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत विश्वविद्यालय:, नवीना दिल्ली (उच्चशिक्षायां अकादमिक बैंक ऑफ क्रेडिट इत्यस्य स्थापना सञ्चालनञ्च) 2021 एक-विंशत्युत्तर-द्वि-सहस्र-तम-वर्षीय: विनियम:, प्रतिपादयितुं शक्यते।
   (2) इमे विनियमा: एस.एल.बी.एस.एन.एस. इति नव दिल्लीस्थेन श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयेन,
   (3) प्रस्तावितेषु सर्वेषु यू.जीति स्नातकीयेषु पी.जीति परास्नातकीयेषु पाठ्यक्रमेषु/कार्यक्रमेषु च क्रियान्वयीकरिष्यन्ते ।
   (4) एते नवदिल्लीस्थस्य एस.एल.बी.एस.एन.एस. विश्वविद्यालयस्य, वैधानिक-निकायै: अनुमोदित-तिथि-त: क्रियान्वयीकरिष्यन्ते।

2. **परिभाषा:** - एतेषु विनियमेषु, यावत् पर्यन्तं सन्दर्भत: अन्यथा अपेक्षितं न स्यात्, -
   1. "अधिनियमस्य" तात्पर्यं 2020 तमाब्दीय: केन्द्रीय-संस्कृत-विश्वविद्यालयस्य अधिनियम: (क्रमाङ्क: 05 वर्षम् 2020) इत्यस्ति ।
   2. "अकादमिक बैंक लेखा" इत्यस्य अर्थ: अस्ति एकेन छात्रेण उद्घाटिते सञ्चालिते अकादमिक बैंक ऑफ क्रेडिट इत्यत्र एका व्यक्तिगत-लेखा, यस्मिन् छात्र-द्वारा अध्ययनस्य पाठ्यक्रमेण अर्जिता: सर्वे शैक्षणिक क्रेडिट इत्यङ्का: अनेन विश्वविद्यालयेन डिग्री/ डिप्लोमा/प्रमाण-पत्र-प्रभृतीनां पुरस्कारस्य प्रयोजनार्थं एकत्रिता:, मान्यतामानीता:, सुरक्षिता:, सञ्चिता:, हस्तान्तरिता:, सत्यापिताश्च विधीयन्ते।
   3. "अकादमिक बैंक ऑफ क्रेडिट" इत्यस्य अभिप्रेतमस्ति केन्द्र-सर्वकारस्य अनुमोदनेन साकं विश्वविद्यालयानुदानायोगद्वारा स्थापितं एकं डिजिटल इत्याख्यं आभासीयम् अन्तर्जालीयम् एकांशरूपम् एकम् अकादमिक-सेवा-तन्त्रम्, येन छात्रा: एतस्य अकादमिक-लेखा-धारक-प्रसङ्गे अनेन लेखा-धारण-सौविध्येन लाभान्विता: भवेयु:, येन वितरित-नमनीयाध्यापन-अधिगमस्य वर्धापनार्थं क्रेडिट

इत्यङ्क-मान्यतायाः, क्रेडिट इत्यङ्क-सञ्चयस्य, क्रेडिट इत्यङ्क-हस्तान्तरणस्य क्रेडिट इत्यङ्क-प्रतिदानस्य एकस्याः औपचारिक-प्रणाल्याः माध्यमेन डिग्रीति प्रमाणपत्र-प्रदातृणाम् उच्च-शैक्षिक संस्थानानाम् मध्ये अभ्यन्तरे च निर्बाधं छात्र-गतिशीलतायाः मार्गः प्रशस्ती भवेत्;

4. "अकादमिक नमनीयतायाः" अर्थः अस्ति नवीनविनिमेय-पाठ्यचर्या-संरचनानां कृते प्रावधानम्, यद् अध्ययनस्य विषयेषु पाठ्यक्रमेषु च कार्यक्रमाणां रचनात्मकं संयोजनं सक्षमं करोति, येन डिग्रीत्यस्य डिप्लोमा इत्यस्य स्नातकोत्तरस्य च अध्ययन-प्रमाण-पत्रस्य कृते भूरि प्रवेशानां भूरि निकासानां च सुविधानां प्रस्तुतिः विधीयते, तत्रैव कठोर-पाठ्यचर्या-सीमाः अपाक्रियते, येन जीवनपर्यन्तम् अधिगमस्य नूतन-संभावनाः उत्पन्नाः भवन्ति।

5. "पाठ्यक्रमः" इत्यस्य अर्थः निर्दिष्टेषु एकांशेषु विशिष्टं भवति यस्मिन् अध्ययनस्य एकः निर्दिष्टः पाठ्यक्रमः/कार्यक्रमः समाविष्टः भवति;

6. "क्रेडिट" इत्यस्य अभिप्रेतम् अस्ति एकस्य सत्रस्य (13-15 **सप्ताहस्य)** अवधेः कृते प्रतिसप्तदिनम् एक-होरायाः सैद्धान्तिकस्य एक-होरायाः ट्यूटोरियल इति अनुशिक्षणस्य अथवा होराद्वय्याः प्रयोगशाला-कार्यस्य गणना-विधानस्य मानक-विधिः यस्य परिणामस्वरूपे एकस्य क्रेडिट इत्यङ्कस्य का पुरस्कारः प्राप्यते; यद्धि केनापि उच्च-शिक्षण-संस्थान-द्वारा प्रदीयते। यस्मिन् एते नियमाः प्रवर्तिताः जायन्ते; इंटर्नशिप इति सेवायै आधिक्येन षट् क्रेडिट इत्याङ्कानाम् अधीने क्रेडिट इंटर्नशिप इति सेवाम्प्रति सप्ताहे एकः क्रेडिट इत्यङ्कः अवाप्स्यते;

7. "क्रेडिट-इत्यङ्क-सञ्चयस्य" अर्थः अकादमिक बैंक ऑफ क्रेडिट इति विधि-द्वारा विरचितं सौविध्यम् अस्ति, यच्च छात्राणां द्वारा पाठ्यक्रमेभ्यः समर्जितं क्रेडिट इत्यङ्कं स्थानान्तरीकर्तुं समेकितं च विधातुं अकादमिक बैंक लेखायाम् उद्धाट्यते;

8. "क्रेडिट-मान्यतायाः" अर्थो भवति एकस्य पञ्जीकृतस्य उच्च-शैक्षणिक-संस्थानस्य माध्यमेन अर्जितः क्रेडिट इत्याङ्कः, यः खलु एतैः उच्चशैक्षणिक-संस्थानैः साक्षाद् अकादमिक बैंक ऑफ क्रेडिट इत्येतस्मिन् कोषे स्थानान्तरितः क्रियते।

9. "क्रेडिट-रिडेम्पशन" इत्यस्य अर्थो भवति उच्च-शैक्षणिक-संस्थानेभ्यः पञ्जीकृत डिग्रीति प्रदातृभ्यः पञ्जीकृत डिग्रीत्यस्य डिप्लोमेत्यस्य प्रमाण-पत्रस्य या पीएचडी पाठ्यक्रमस्य / कार्यक्रमस्य चेत्यादिभ्यः तथा कोर्स वर्क इत्येतेभ्यः क्रेडिट इत्याङ्कानाम् आवश्यकतानां सम्पूरणस्य उद्देश्येन ए.बी.सी. इत्येतस्मिन् विरचितासु छात्राणाम् अकादमिक-बैंक-लेखासु समर्जित क्रेडिट इत्यङ्कानाम् स्थानान्तरणस्य प्रक्रिया;

10. "क्रेडिट-ट्रांसफर" इत्यस्य तात्पर्यं तेन तन्त्रेण वर्तते येन पञ्जीकृतानि उच्च-शैक्षणिक-संस्थानानि भारताभ्यन्तरे केषुचिदपि पञ्जीकृतेषु उच्च-शिक्षा-संस्थानेषु नामांकितैः छात्रैः विहितेभ्यः 'पाठ्यक्रमेभ्यः' विश्वविद्यालयानुदानायोगस्य क्रेडिट

इत्यङ्कानां मानदण्डानाम् अनुपालने व्यक्तिगतासु शैक्षणिक-बैंक-लेखासु निर्धारितान् क्रेडिट इत्याङ्कान् प्राप्तुं प्रदातुं सक्षमन्ते।

11. "व्यावसायिक-मानक-निर्धारण-निकायस्य" अभिप्रायम् उच्च-शिक्षाया: संगत-क्षेत्रेषु मानकानां निर्धारणार्थं तेषां यथावस्थमेव प्रवर्तनार्थं च संसद: एकस्य अधिनियमस्य अन्तर्गतं निर्मितः, स्थापित: घटितो वा एक: नियामक: प्रमुखनिकाय: वर्तते;
12. "कार्यक्रमस्य" अथवा "अध्ययन-कार्यक्रमस्य" अर्थो भवति विश्वविद्यालयानुदानायोगस्य अधिनियमस्य धारा 22 इत्यस्य उप-धारा (3) इत्यस्य अन्तर्गतम् आयोग-द्वारा निर्दिष्टस्य डिग्रीत्यस्य कृते प्रवर्तमानः उच्चशिक्षाकार्यक्रम:;
13. "पञ्जीकृतोच्च-शिक्षा-संस्थानस्य" अभिप्रायम् एकम् समर्हणीयम् उच्च-शैक्षणिक-संस्थानमस्ति यद्धि एतेषां विनियमानाम् अन्तर्गतम् अकादमिक बैंक ऑफ क्रेडिट्स इति द्वारा पञ्जीकृतम् अस्ति;
14. "वैधानिकप्राधिकरणम्" इत्यस्य अभिप्रायम् अस्ति उच्च-शिक्षण-संस्थानान्नां वैधानिक-निकाया:, तद्यथा शासीपरिषद् (गवर्निंग काउंसिल) अथवा कार्यपरिषद् , या संस्थान-पक्षत: निर्णयम् अभिस्वीकर्तुं सक्षमन्ते।
15. "छात्र:" इत्यस्य अभिप्रायम् अस्ति एकस्मिन् उच्च-शिक्षा-संस्थाने अध्ययनस्य एकस्मिन् निर्दिष्ट क्रेडिट-आधारिते पाठ्यक्रमे/कार्यक्रमे लब्ध-प्रवेश: वर्धिष्णु: जन:।

**3. अकादमिक बैंक ऑफ क्रेडिट. इत्यङ्ककोष:-**

1. अकादमिक बैंक ऑफ क्रेडिट इत्यङ्क-कोष: एतेषां विनियमानां माध्यमेन विरचितोचित-क्रेडिट इत्यन्तरण-तन्त्रेण साकं देशस्य उच्च-शिक्षा-संस्थानेषु पाठ्यक्रम-संरचनाया: नमनीयतानां, छात्राणाम् अन्तर्विषयक-बहु-विषयक-शैक्षणिक-गतिशीलताया: वर्धनार्थम् एका राष्ट्रिय-स्तरस्य सुविधा भविष्यति। यच्च सैविध्यम् छात्रेभ्य: एकाधिकै: प्रवेशै: एकाधिकै: निकासै: (मल्टीपल एंट्री-मल्टीपल एग्जिट) साकमेव कस्मिन्नपि समये, कुत्रापि कस्मिन्नपि स्तरे अधिगमस्य सिद्धान्ते कार्यं कुर्वदेव डिग्री/डिग्री (मानद) डिप्लोमा, स्नातक-स्नातकोत्तर डिप्लोमा चेति प्रमाणपत्रैः सहितानां अकादमिक-शैक्षिक-योग्यतानां समर्हतानां च प्राप्त्यर्थं स्वीयाधिगमस्य मार्ग-प्रचयनस्य सुविधां प्रददाति।
2. अकादमिक बैंक ऑफ क्रेडिट इत्यङ्क-कोष: उच्च-शिक्षाया: भूरि विषयाणाम् एकीकरणं करिष्यति, येन विवर्धिता रचनात्मकताया:, नवाचारस्य, उच्च-क्रमस्य विचार-विमर्शै: महत्वपूर्ण-विश्लेषणैश्च समेता: वाञ्छिता: शिक्षण-परिणामा: प्राप्ता: भविष्यन्ति।
3. अकादमिक बैंक ऑफ क्रेडिट इत्यङ्क-कोष-द्वारा नैकेषु उच्च-शिक्षा-विषयेषु संस्थानेषु च अध्ययन-कार्यक्रमस्य कृते पाठ्यक्रमाणां व्यापक-रुचिमत्ताया:, पाठ्यक्रमे नमनीयताया:, नूतनाकर्षक-पाठ्यक्रमस्य विकल्प-प्रदानस्य माध्यमेन छात्रेभ्य: महत्वपूर्ण-स्वायत्तता प्रदास्यते।

4. **अकादमिक बैंक ऑफ क्रेडिट इत्यङ्क-कोषस्य उद्देश्य: -**

1. समस्ते देशे उच्चशिक्षाक्षेत्रे छात्रानुकूल-दृष्टिकोणेन साकं छात्र केन्द्रिताध्यायनस्य अभिवर्धनम्, उच्चशिक्षायाम् आधिक्येन अन्तर-अनुशासनात्मक-दृष्टिकोणस्य समेधनम्।
2. छात्राणां योग्यताया: ज्ञानस्य अन्वेषणस्य चानुरूपं सर्वोत्तम पाठ्यक्रमस्य सञ्चयने पाठ्यक्रमाणां च संयोजनस्य चयनार्थं छात्रेषु सक्षमताया: आपादनम्।
3. छात्रेभ्य: सम्बद्धस्य रसद इत्यनेन व्ययेन च साकम् स्वकीयाध्ययनार्थं एकस्या: गते: चयनस्य अनुमति-प्रदानम्।
4. छात्रेभ्य: कस्यचिद् विश्वविद्यालयस्य गहन-नियमित-रूपेण निर्धारितानां डिग्रीत्यस्य पाठ्यक्रमाणां वाधिगमनस्य स्थाने स्वीयं डिग्रीति प्रमाण-पत्रम् अनुकूलयितुं विशिष्टसंशोधनस्य विशेषज्ञतायाश्च सुविधाप्रदानम्।
5. छात्रेभ्य: तेषां समयस्य प्राथमिकतानाम् अनुसारेण निजे डिग्री कार्यक्रमे प्रतिस्पर्धायै मल्टीपल एन्ट्रीति बहुधा-प्रवेशस्य -मल्टीपल एग्जिट इति बहुधानिकासस्य च सक्षमतार्थं, डिग्री-डिप्लोमा-कार्यक्रमेषु स्नातकोत्तर-डिप्लोमा-कार्यक्रमेषु प्रमाणपत्रीय-कार्यक्रमेषु विद्यावारिधि-कार्यक्रमेषु च कोर्स वर्क इति कार्यार्थं विभिन्न-विषयेषु एच.ई.आई. इत्येतस्मिन् च गतिशीलता-प्रदानम्।
6. समेधित-गतिशीलतया साकं विश्वविद्यालयेषु एकीकरणस्य माध्यमेन, प्रक्रियात्मक-रूपेण, शिक्षण-
   गतिविधीनां प्रपूराने मिश्रित-पद्धत्या तदाचरणे च साहाय्याचरणम्।
7. समेषां मध्ये, अर्थात् औपचारिक-प्रकल्पस्य अनौपचारिक-प्रकल्पस्य च छात्रेभ्य: पूर्णकालिक-रूपेण:अंशकालिकत्वेन च नियमितरूपेण, दूरस्थ माध्यमेन, अन्तर्जालीय-पद्धत्या यथेष्टं पद्धतिद्वय्यापि आजीवनम् अधिगमस्य सौविध्य-प्रदानम्।
8. छात्राणां ज्ञानान्वेषण-पिपासां सन्तोषयितुं, तेषां शैक्षणिक-दिशा प्रचयनस्य परिवर्तनस्य च स्वतन्त्रता-प्रदान-पूर्वकं, ज्ञानस्य विभिन्नानां शाखानां संयोजनम्, छात्रेभ्य: स्वजीवने लक्ष्याधिगमनार्थं समुचिताधारस्य विरचने लक्ष्यस्य निर्माणे च साहाय्याचरणम्।

5. **अकादमिक बैंक ऑफ क्रेडिट इत्यस्य संघटनात्मक-संरचना-**

1. अकादमिक बैंक ऑफ क्रेडिट इत्यङ्कीय-कोष: एतस्य विश्वविद्यालयस्य अकादमिक क्रेडिट डेटा बेस इत्याख्य: प्रकल्प: एक: डिजिटल इति अङ्कीय: वर्चुअल इति आभासीय: ऑनलाइन स्टोर-हाउस इति अन्तर्जालीय: भाण्डागार: एकांश: भविष्यति, यस्य हितधारका: छात्रा: भविष्यन्ति।
2. अकादमिक बैंक ऑफ क्रेडिट्स इति राष्ट्रिय अकादमिक डिपॉजिटरी/डिजीलॉकर इत्यस्य आधारे भारत-सर्वकार-द्वारा स्थापित-गतिशील-वेबफलकस्य माध्यमेन सञ्चालयिष्यते, येन एतस्य विश्वविद्यालयस्य सर्वेषां छात्राणाम् उपयोगार्थम् अकादमिक बैंक ऑफ क्रेडिट्स इत्यस्य, परिचालन-तन्त्रस्य च सर्वाणि विवरणानि प्रदास्यन्ते।

3. अकादमिक बैंक ऑफ क्रेडिट इति कोष: वित्तीयोद्देश्यार्थं वाणिज्यिक-बैंकानि इव अकादमिक उद्देश्यार्थं एकं बैंकम् भविष्यति, यत्र छात्रा: अकादमिक लेखधारका: भविष्यन्ति, यदर्थं अकादमिक बैंक ऑफ क्रेडिट इत्युपक्रम: एतेषां छात्राणां क्रेडिट इत्यङ्कानां सत्यापनं क्रेडिट इत्यङ्कानां सञ्चयं, क्रेडिट इत्यङ्कानां हस्तान्तरणम् प्रतिदानम् अकादमिक-पुरस्काराणां प्रमाणीकरणञ्च समेत्य विभिन्न-प्रकारका: सेवा: प्रदास्यति।
4. अकादमिक बैंक ऑफ क्रेडिट्स इत्युपक्रम-द्वारा क्रेडिट इत्यङ्कानां अकादमिक-पुरस्काराणाञ्च प्रमाणीकरणम्, कथमपि , डिग्रीति प्रदानार्थं अन्य-शैक्षणिक-योग्यता-प्रदानार्थञ्च अकादमिक बैंक ऑफ क्रेडिट्स इत्यनेन साकं पञ्जीकृत-विश्वविद्यालयस्य वैधानिक-शक्तीनाम् अतिक्रमणत्वेन नैव स्वीकरिष्यते ।
5. ए.बी.सी. पञ्जीकृतोच्च-शिक्षा-संस्थानानां छात्रै: समर्जितानां क्रेडिट इत्यङ्कानां प्रमाणिताम् अभिलेखकीर्तिमात्ताम् प्रदातुं, जयादृशम् अपि प्रकरणं कथं न स्यात्, केन्द्र सर्वकारस्य विश्वविद्यालयानुदानलनायोग-द्वारा प्रदत्त-सामर्थ्य-निकायत्वेन कार्यम् आचरिष्यति।
6. केषुचिदपि स्नातकीयेषु स्नातकोत्तरीयेषु डिप्लोमा इत्येतेषु च कार्यक्रमेषु प्रमाण-पत्र-प्रदानार्थं क्रेडिट इत्यङ्कानाम् आवश्यकतया साकमेव अध्ययनस्य आवश्यक-घटका: आवश्यका: भविष्यन्ति, पी.एच.डी. इति विद्यावारिधि-कार्यक्रमस्य कृते पाठ्यक्रम: कार्यस्य आवश्यकताश्च पञ्जीकृतै: विश्वविद्यालयै: निर्धारितस्य विधेरनुसारेण भविष्यन्ति।
7. अकादमिक बैंक ऑफ क्रेडिट इत्यङ्कानाम् कोष: प्रत्येकमपि छात्रेभ्य: डिजिटल इति आभासीयाङ्कीय-रूपे विशिष्ट- व्यक्तिगताकादमिक-बैंक-लेखानाम् उद्घाटनस्य सौविध्यम् उपपादयिष्यति; अथ च लेखा-धारकेभ्य: एकस्य विशिष्टस्य आईडी इति अभिज्ञानस्य मानक-सञ्चालन-प्रक्रियां (एस.ओ.पी.) यावत् सम्प्राप्तिमपि सुनिश्चेष्यति ।

## 6. अकादमिक बैंक क्रेडिट इत्यङ्ककोषस्य कार्यम्-

1. अकादमिक बैंक ऑफ क्रेडिट इत्यङ्ककोष:, पञ्जीकृतै: उच्च शिक्षासंस्थानै: वितरितान् क्रेडिट इत्यङ्कान् छात्राणाम् अकादमिक बैंक-लेखासु एकत्री-करिष्यति, किञ्च उक्त-वैधताया: वैधता समये समये विश्वविद्यालयानुदानायोग-द्वारा प्रसारित-मानदण्डानाम् दिङ्निर्देशानाम् अनुसारेण वर्तिष्यते :

   ध्येयम् अस्ति यत् ए.बी.सी. इति प्रकल्प: साक्षात्-छात्रेभ्य: पाठ्यक्रमस्य क्रेडिट इत्यङ्क-सम्बद्धानि कानिचन अपि प्रपत्रकाणि नैव अभिस्वीकारिष्यति, अथ च एतानि प्रपत्रकाणि केवलं तदानीमेव वैधत्वेन अभिस्वीकारिष्यति यदा तानि क्रेडिट इत्यङ्कानां प्रदातृभि: सम्बद्धै:, पञ्जीकृतोच्च-शिक्षा-संस्थानै: प्रेषितानि भवेयुः।
2. ए.बी.सी. इत्युपक्रम: एतेषां विनियमानाम् अन्तर्गतम् उच्च-शिक्षा संस्थानानि पञ्जीकृतानि विधास्यति, अकादमिक-बैंक-लेखानां उद्घाटनम्, समापनम्, सत्यापनञ्च

सुनिश्चेष्यति। छात्रेभ्य: हितधारकाणां मध्ये स्वीय-भूमिकाया: संवर्धनम् अतिरिच्य क्रेडिट इत्यङ्कानां सत्यापनम्, क्रेडिट इत्यङ्कानां सञ्चयं, क्रेडिट हस्तान्तरणं प्रतिदानञ्च सुनिश्चितं करिष्यति।

3. छात्रैः स्वयमेव, नोटेल-वी-लैब-सन्निभासु राष्ट्रिय-योजनासु उत वा केषाञ्चिद् निर्दिष्ट-पञ्जीकृतानां एच.ई.आई. एवं ऑनलाइन इत्यन्तर्जाल-माध्यमेन कृतेषु पाठ्यक्रमेषु अपि क्रेडिट इत्यङ्कानां हस्तान्तरणस्य क्रेडिट इत्यङ्कानां सञ्चयस्य च कृते अपि विचारो विधास्यते।
4. ए.बी.सीत्यस्य कार्याणि केवलम् अनेन सह दूरस्थ-मध्यमं सम्पर्केतर-माध्यमं यावदेव सीमितानि नैव वर्तन्ते; एतानि कार्याणि विभिन्न-विद्यमान-शिक्षण-प्रतिदर्शानां भविष्यत्कालिकीय-शिक्षणाधिगम-प्रतिदर्शानाञ्च समामेलनं यावत् विस्तारितानि भविष्यन्ति। यदि तानि पृथक्-पृथक् क्रेडिट इत्यङ्कानां पाठ्यक्रमाणां रूपेण प्रस्तूयन्ते चेद् अस्मिन् सैद्धान्तिकस्य प्रायोगिक-कार्यस्य च मूल्याङ्कने छात्रै: अधिगतानां क्रेडिट इत्यङ्कानां विषये अपि विचारो विधास्यते।
5. पाठ्यक्रम-सामग्रीणां, पाठ्यक्रमाणां च विनियमे, सम्प्रस्तुत- पाठ्यक्रमाणां कृते शैक्षिक-प्रौद्योगिकीनां, तेषाम् अवधे:, निरन्तरं मूल्याङ्कन-विधीनाम्, उपस्थितेः, मूल्याङ्कनस्य च कृते नूतन विधीनां विषये मानदण्डा: नव-दिल्लीस्थेन एस.एल.बी.एस.एन.एस. विश्वविद्यालयेन निर्धारयिष्यन्ते, अथ च 2020 तम-वर्षस्य राष्ट्रिय-शिक्षा-नीते: अन्तर्गतम् समग्र-बहु-विषयक-शिक्षाया: व्यापक-नीते: दर्शनस्य चानुरूपं भविष्यन्ति।
6. छात्राणां हितानि ध्यात्वा ए.बी.सीत्यमुना साकम् समर्जिता: एकत्रिता: च क्रेडिट इत्याख्या: अङ्का: डिग्री-डिप्लोमा-प्रतिपादनस्य पोस्ट ग्रेजुएट डिप्लोमा इति परास्नातक-प्रमाणपत्रस्य प्रतिदानस्य च उद्देश्येन एस.एल.बी.एस.एन.एस. विश्वविद्यालय: नवदिल्ली द्वारा अधिकतमम् सप्त-वर्षाणाम् अवधे: अधीनम्, निर्दिष्ट-पृथक्-पृथक् अवधये वैधा: भविष्यन्ति।
7. अकादमिक-बैंक-ऑफ-क्रेडिट्स इत्यङ्क-कोषे विश्वविद्यालयानुदानायोगस्य, अखिल-भारतीय-प्राविधिक-शिक्षा परिषद: राष्ट्रियाध्यापक-शिक्षा-परिषदश्च परिधौ समागताः सर्वे उच्च-शिक्षा-कार्यक्रमा: समावेशिता: भविष्यन्ति; अन्य-विषयाणां विषये अध्ययनस्य व्यावसायिकेषु कार्यक्रमेषु क्रेडिट इत्यङ्का: उपयुक्त-व्यावसायिक-मानक-निर्धारण-निकायानां केन्द्र-सर्वकारस्य च अनुमोदनेन समावेशितुं शक्यन्ते।
8. अकादमिक-बैंक-ऑफ-क्रेडिट इत्यङ्क-कोषे तेभ्यः छात्रेभ्य: क्रेडिट इत्यङ्कानां मान्यताया: क्रेडिटbइत्यङ्क-प्रतिदान-प्रक्रियाया: च सुविधा-प्रदानं करिष्यते, ये स्वीय वैयक्तिकाभिरुचे: अनुसारेण, सर्वेषां पाठ्यक्रमाणां कृते विकल्पं प्रचेतुम् अर्हन्ति, ये कस्मिंश्चित् विशेष-विषय-क्षेत्रे नैव समायान्ति, किन्तु एस.एल.बी.एस.एन.एस. विश्वविद्यालय:, नवदिल्ली द्वारा प्रदीयमानानां स्नातकीय-डिग्रीति प्रमाण-पत्रार्थं समग्राणां क्रेडिट इत्यङ्कानाम् आवश्यकता: सम्पूरयन्ति।
9. विश्वविद्यालये/पञ्जीकृतोच्च-शिक्षा-संस्थाने विशिष्टोच्च-शिक्षा-कार्यक्रमस्य एक-भाग-रूपेण छात्र-द्वारा प्रचितान् अभिरुच्याधारितान् पाठ्यक्रमान् अतिरिच्य, छात्रा: तादृशेभ्य:

डिग्रीति कार्यक्रमेभ्य: निर्धारित-पाठ्यक्रमात् परे स्वीय-योग्यताया: अतिरिक्त-पाठ्यक्रम-स्वीकरणे अपि निज-सम्बद्ध-शैक्षणिक-बैंक-लेखायां क्रेडिट इत्यङ्कानां एकत्री-करणे स्वतन्त्रा: भविष्यन्ति :

तत्रैक: समयः भविष्यति यत् पञ्जीकृतोच्च-शिक्षा-संस्थानानि निर्धारित-पाठ्यक्रमान् अतिरिच्य छात्रद्वारा प्रचित-पाठ्यक्रमाणां विषये समर्जितान् क्रेडिट इत्यङ्कान् प्रति डिप्लोमा उत वा प्रमाणपत्रं प्रदातुं समर्हणीयानि भवेयुः।

10. व्यावसायिक-डिग्री-डिप्लोमा उपक्रमाणां स्नातकोत्तर डिप्लोमा प्रमाणपत्र-कार्यक्रमाणां च प्रस्तोतृणां विश्वविद्यालयानां/ पञ्जीकृतोच्च-शिक्षा-संस्थानानां च कौशल-पाठ्यक्रमेषु लब्धप्रवेशै: छात्रै: प्राप्ता: क्रेडिट इत्यङ्का: चापि अकादमिक बैंक ऑफ क्रेडिट इत्यङ्क-कोष-माध्यमेन क्रेडिट इत्यङ्कानां सञ्चयार्थं प्रतिदानार्थं च पात्रतां धरन्ति।
11. 2021-22 तमीय-शैक्षणिक-वर्षस्य अवसरे तदनन्तरे च विश्वविद्यालयेषु/पञ्जीकृतोच्च-शिक्षा-संस्थानेषु पाठ्यक्रमाणां प्रारम्भे सति प्राप्ता: क्रेडिट इत्यङ्का: एकत्र अकादमिक बैंक ऑफ क्रेडिट इत्यङ्क-कोषीय-माध्यमेन क्रेडिट इत्यङ्क हस्तान्तरणार्थं, क्रेडिट इत्यङ्क-सञ्चयार्थं क्रेडिट-इत्यङ्क-प्रतिदानार्थं च समर्हा: भविष्यन्ति।
12. अकादमिक बैंक ऑफ क्रेडिट्स इत्यङ्क-कोषीयाणाम् उद्देश्याणां च प्रपूरणार्थं, एस.एल.बी.एस.एन.एस. विश्वविद्यालय: अकादमिक बैंक ऑफ क्रेडिट्स इत्यङ्क-कोषम् वित्तीयां प्रशासनिकीञ्च सहायतां याचितुं शक्नोति, यथा विश्वविद्यालयानुदानायोगस्य पक्षत: समुचितं मंस्यते।

7. **अकादमिक बैंक ऑफ क्रेडिट्स इत्यङ्क-कोषेण साकं पञ्जीकरणार्थं विश्वविद्यालयस्य/एच.ई.आई.एस. इत्यस्य अभिस्वीकृत्यर्थं पात्रता-मानदण्ड:।**

1. श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालय:, नवीना दिल्ली-ए.बी.सीति विनियमनस्य 1.2 इत्यस्य सम्पूरक: विश्वविद्यालय: स्वायत्त महाविद्यालया:, ये खलु राष्ट्रिय-मूल्याङ्कन-प्रत्यायन-परिषद्द्वारा न्यूनान्न्यूनमपि 'ए' श्रेण्या समं अथवा राष्ट्रिय-प्रत्यायन-मण्डल-द्वारा न्यूनान्न्यूनं त्रिभ्यः कार्यक्रमेभ्य: व्यक्तिगत-रूपेण (675) पञ्च-सप्तत्युत्तर षट्-शत-मितै: न्यूनतमै: अङ्कै: साकम् मान्यता प्राप्तो वर्तते (तत्रैव, यदि संस्थान-द्वारा सञ्चाल्यमाणानां कार्यक्रमाणां संख्या त्रय- त: न्यूना: सन्ति चेत्, प्रत्येकमपि कार्यक्रमेषु (675)पञ्च-सप्तत्युत्तर षट्-शत-मिता: न्यूनतमा: अङ्का: नूनमेव अधिगता: भवेयुः। अथवा ततोऽधिका: अङ्का: प्राप्तव्या: भविष्यन्ति); अथ च शीर्षस्था: शतमितानि राष्ट्रियाणि संस्थागतानि मानाङ्कन-कार्य-प्रारूपाणि (एन.आई.आर.एफ.) उत भारत-सर्वकार-द्वारा समये समये संस्थापिता: संस्थाप्यमाणा: वा समान-मूल्याङ्कन-प्रत्यायन-निकाया: अथ क्वाक्वेरेली साइमंड्स (क्यू.एस.)/टाइम्स हायर एजुकेशन (टी.एच.ई.) इत्यस्य शीर्षस्थानां सहस्रमितानां विश्व-मानाङ्कने समाहितानां भारतीयोच्च-शिक्षा-संस्थानम्; भारत-सर्वकार-द्वारा अकादमिक बैंक ऑफ क्रेडिट इत्यङ्क-कोषेण साकं पञ्जीकरणार्थं पात्रत्वेन घोषितानि प्रतिष्ठितानि संस्थानानि राष्ट्रिय-महत्तत्त्वस्य संस्थानानि च।

2. अकादमिक बैंक ऑफ क्रेडिट्स इत्यर्जिताङ्क-कोषेण साकं पञ्जीकरणस्य समये मान्यताया: मानाङ्कनस्य च स्थिति: वैधत्वेन प्रवर्तमाना भवेत्।
3. अकादमिक बैंक क्रेडिट इत्यर्जिताङ्क-कोषेण साकं पञ्जीकरणस्य कृते आवेदनार्थं एच.ई.आई. इत्यनेन निज-सम्बद्धै: वैधानिकै: अधिकारिभि: यथा शासी-परिषदा, कार्यपरिषदा, सिंडिकेट इत्यनेन, प्रबन्धन-मण्डलेन, अकादमिक-परिषदादिभि: अनुमोदनम् अधिगन्तव्यं भविष्यति।
4. पञ्जीकृतोच्च-शिक्षा-संस्थानै: सम्पूर्णेषु डिग्रीति कार्यक्रमेषु प्रवेशं विहाय, छात्रेभ्य: व्यक्तिगत-पाठ्यक्रमेषु अपि प्रवेशो प्रदेयो भविष्यति:

अत्रैक: समयः अस्ति यत् केषाञ्चिदपि उच्च-शिक्षा-संस्थानानां पाठ्यक्रमेषु सम्मर्दात् सुरक्षितुम्, उक्तोच्च-शिक्षा-संस्थानेभ्य: एतादृशेषु पाठ्यक्रमेषु अतिरिक्तानां (सीटें) आसनानां सुरक्षणस्य अनुमति: प्रदास्यते, यद्धि उपयुक्त-व्यावसायिक-मानक-निर्धारण-निकाय-द्वारा पूर्व अनुमोदनस्य अधीनं भविष्यति:

अत्रेदमवधेयं यत् तेषां पाठ्यक्रमाणां सम्बन्धे, यच्च कस्यापि व्यावसायिक-मानक-संस्थापक-संस्थानस्य परिधौ नैव समायाति, पञ्जीकृतोच्च-शिक्षा-संस्थानम्, आवश्यकाधारिक संरचनानाम् उपलब्धताया: अधीनम्, स्वकीयानां वैधानिकानाम् अधिकारिणाम् अनुमोदन-पूर्वकम् अतिरिक्तानि आसनानि उपपादयितुं समर्हति।

अत्राप्ययं समयोऽस्ति यत्, पञ्जीकृतोच्च-शिक्षा-संस्थानम् विशेष-रूपेण अकादमिक बैंक ऑफ क्रेडिट इत्यङ्क-कोषीय-योजनाया: प्रयोजनार्थं पाठ्यक्रमाणां एकां व्यवस्थामपि सेट इति समुपस्थापयितुं प्रभवत।

5. श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य पार्श्वे संगतानां विश्वविद्यालयानुदानायोगस्य विनियमानां/ श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य अध्यादेशानां/य प्रतिमानाम् अध्यादेशानाञ्च अन्तर्गतं समये समये निर्दिष्टेभ्य: ओ.डी.एल. इत्येतेभ्यः ऑन-लाइन इति अन्तर्जालीय-पाठ्यक्रमेभ्य: कार्यक्रमेभ्य: साक्षात् सम्मुखीकरण-माध्यमेन सैद्धान्तिकेभ्य: व्यावहारिकेभ्य:/ प्रशिक्षण पाठ्यक्रमेभ्यश्च अन्येषाम् आधारिक-सैविध्यानां समर्नार्थं ऑडियो-विजुअल इति श्रव्य-दृश्य-सैविध्यानां, ई-संसाधनानां, वर्चुअल इति कक्षाणां स्टूडियो चेत्यादीनां विशेषरूपेण उच्च सामर्थ्य-युक्याया: अन्तर्जालीय-सम्पृक्ते: सन्दर्भे उपयुक्त-शैक्षणिकी आधारिकी संरचना भवितुं शक्नोति।
6. श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य वेबसाइट इति अन्तर्जाल-फलके एकं वेब फलकीयं पृष्ठं भविष्यति यस्मिन् अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्ककोषीय-सैविध्यानां विवरणम्, सर्वेषां पञ्जीकृतानाम् उच्चशिक्षा-संस्थानानाम् सूची, छात्रेभ्य: अस्य सौविध्यस्य प्रभावपूर्णरीत्या उपयोग-करणार्थं प्रदत्तानां

दिङ्निर्देशानाम् अनुदेशानां मानक-सञ्चालन प्रक्रियाभि: साकामेव अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्ककोषीय-वेब-फलकस्य सम्पृक्ति: (लिंक) अपि भविष्यति।

## 8. अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्ककोषस्य कार्यान्वयनविधि: -

1. अकादमिक बैंक ऑफ क्रेडिट-इत्यर्जिताङ्ककोष: अनिवार्यरूपेण एका क्रेडिट-इत्यर्जिताङ्क-कोषाधारिता अत्यधिक-नमनीया, छात्र-केन्द्रिता सुविधा वर्त्तते।
2. श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालय: निज-वैधानिक-प्राधिकारिणाम् अनुमोदनेन अन्यै: प्रसङ्गै: समं पाठ्यक्रमपञ्जीकरणम्, पाठ्यक्रमाणामावश्यकता:, अंतर-विषयकानां बहु-विषयकानाञ्च पाठ्यक्रमाणाम् अभिस्वीकृतिं, एतेभ्यः पाठ्यक्रमेभ्य: प्रदीयमानान् क्रेडिट इत्यर्जिताङ्कान्, अन्येषाम् अनुमोदितानाम् उच्च-शिक्षा-संस्थानानाम् क्रेडिट इत्यर्जिताङ्कानां हस्तान्तरणं और क्रेडिट इत्यर्जिताङ्कानां स्वीकृतिं, वितीर्यमाणानां ग्रेड इति श्रेणीनां प्रकृतिम् अन्यांश्च वर्तमानान् एतत सम्बद्धान् अध्यादेशान् संशोधयिष्यति।
3. श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालय: एकाधिकै: पञ्जीकृतोच्च-शिक्षा-संस्थानै: सञ्चाल्यमानेषु पाठ्यक्रमेषु छात्रद्वारा प्रचितानां पाठ्यक्रमाणाम् उपयोगं कृत्वा स्वयस्य डिग्रीत्यस्य स्वयमेव अनुकूलनं डिजाइन इति सुसज्जित प्रारूपी-करणञ्च कर्तुं छात्रान् प्रोत्साहितान् सक्षमांश्च करिष्यति। :

   तत्रैक: समयः अस्ति यत्, छात्रै: डिग्री-डिप्लोमा-प्रमाणपत्र प्रदातृकेभ्य: उच्चशिक्षासंस्थानेभ्य: न्यूनान्न्यूनं प्रतिशतं पञ्चाशन्मितं क्रेडिट इत्यर्जिताङ्का: नूनमेव प्राप्तव्या: भविष्यन्ति।

   आत्रेदमप्यवधेयं यत्, छात्रै: डिग्री-डिप्लोमा या-प्रमाणपत्रादीनां प्राप्तये आवश्यके मुख्य-विषय-क्षेत्रे आवश्यक-परिमाणेन क्रेडिट इत्यर्जिताङ्का अपरिवार्यत्वेन अधिगन्तव्या: भविष्यन्ति, यथा डिग्रीति प्रदायकेन उच्चशिक्षा-संस्थानेन निर्दिष्टमस्ति, यस्मिन् छात्र: नामाङ्कित: अस्ति।

4. उप-विनियमे (3) त्रि-संख्याके प्रदत्ता ए.बी.सी. इत्यस्य सुविधान्तर्गतं नमनीयताया: लाभ-प्राप्त-कर्त्तार: छात्रा: केवलम् स्वीयाभिरुचे: योग्यतायाश्च पाठ्यक्रमाणां सदस्यतार्थम् अधिकृता: भविष्यन्ति, येन तादृशाः ते छात्रा: पञ्जीकृतोच्च-शिक्षा-संस्थान-द्वारा डिग्रीति प्रदानार्थम् निश्चिताध्ययनस्य सम्पूर्णान् कार्यक्रमान् अतिरिच्य क्रेडिट इत्यर्जिताङ्कान् समधिगन्तुं समर्थाः भवेयुः।
5. ए.बी.सीति उच्च-शिक्षा-संस्थाने एका गतिशीलाया: ऑनलाइन इति अन्तर्जालीयाया: निर्देशिकाया: अनुरक्षणं करिष्यते या पात्रता मानदण्डान् सम्पूरयेत्।

1. प्रत्येकमपि पञ्जीकृतोच्च-शिक्षा-संस्थानम् अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्क-कोषेण साकं अकादमिक-बैंक-लेखाया: उद्घाटनेच्छुकेभ्यः सर्वेभ्य: छात्रेभ्य: क्रेडिट इत्यर्जिताङ्ककोषस्य परिभाषा-विषये, क्रेडिट इत्यर्जिताङ्ककोषस्य सञ्चयविषये, क्रेडिट इत्यर्जिताङ्कानां हस्तान्तरण-विषये , क्रेडिट इत्यर्जिताङ्कानां प्रतिदानेन साकमेव छात्राणाम् अकादमिक-बैंक-लेखानाम्, उद्घाटन-विषये, पिधानविषये, मान्यता-प्रदान-विषये च अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्ककोषस्य सेवानाम् उपयोगस्य विवरणस्य च सम्बन्धे छात्र-परामर्शं मार्गदर्शनञ्च सम्प्रदास्यति, यत्र एतादृशा: अनुरोधा: मूल-विश्वविद्यालयस्य स्वायत्त महाविद्यालयानां माध्यमेन अनुशंसिता: विधीयन्ते, ये पूर्वतः एव अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्क कोषेण साकं पञ्जीकृता: सन्ति।
2. छात्रै: समर्जिता: क्रेडिट इत्यार्जिताङ्का: ए.बी.सी. इत्यनेन साकं सम्बद्धासु शैक्षणिक-बैंक-लेखासु एकत्रीकरिष्यन्ते क्रेडिट इत्यर्जिताङ्क-प्रदायकै: संस्थानै: निर्दिष्टेभ्य: सप्तवर्षेभ्यः अधिककालार्थं वैधा: नैव भविष्यन्ति। अथ च केषाञ्चिदपि डिग्री-डिप्लोमा-प्रमाणपत्राणां पुरस्कारेभ्य: क्रेडिट इत्यर्जिताङ्कानां रूपान्तरणस्य उद्देश्येन शैक्षणिक-योग्यता-प्रदायकानां पञ्जीकृतोच्च-शिक्षा-संस्थान-द्वारा एतस्याः स्वीकृते: अधीना; भविष्यन्ति।

   अत्रैक: समय: भविष्यति यदेकवारम् उपरोक्त-शैक्षणिक-योग्यताया: प्रदानार्थं कश्चिद् अपि क्रेडिट इत्यर्जिताङ्कानामुपयोग: भवेत्, तर्हि एतादृशै: क्रेडिट इत्यर्जिताङ्कै: सम्बद्धस्य छात्रस्य शैक्षणिक-बैंक-लेखात: अपरिवर्तनीय-रूपेन समाहृता: विधास्यन्ते।

3. यत्र कश्चिदपि छात्र: निर्दिष्टानां डिग्री-डिप्लोमा चेत्येतेषाम् पोस्ट ग्रेजुएट इति परास्नातकीयानां डिप्लोमा इत्येतस्य प्रमाणपत्राणां च प्राप्तये पञ्जीकृतोच्च-शिक्षा-संस्थान-द्वारा अनुमोदितानां क्रेडिट इत्यर्जिताङ्कानां समग्र-संख्यानां क्रेडिट इत्यस्य प्रकृते: पर्याप्ततायाश्च मानदण्डान् सम्पूरयति, तदा छात्र: तस्माद् उच्च-शिक्षा-संस्थानाद् एतदधिगन्तुं समर्हणीय: भविष्यति।

4. एकवारम् उपयोगस्य अनन्तरं न कैश्चिदपि छात्रै: अर्जितस्य क्रेडिट इत्यङ्कस्य कञ्चिदपि अन्यौपचारिक-शैक्षणिक-योग्यताधिगमनार्थं पुनरुपयोगं नैव कर्तुं शक्यते।
   5.स्वीय-वैधानिक-प्राधिकारिणाम् अभिस्वीकृत्या साकम्, एकम् पञ्जीकृतोच्च-शिक्षा-संस्थानं बहु-विषयकम् अन्तर्विषयकम् उच्च शिक्षोपक्रमं संवर्धितुं समुचिताभि: क्रेडिट इत्यर्जिताङ्कानाम् आवश्यकताभि: साकं कोर इति मुख्य-पाठ्यक्रमाणां कोर इति ऐच्छिकानाम् मुक्तैच्छिकानां कौशलवर्धकैच्छिकानां वा क्षमता संवर्धकैच्छिकादीनां पाठ्यक्रमाणां रूपे प्रस्तुतीकृतानां पाठ्यक्रमाणां संरचना: विभाजितुं अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्कीय-कोष-द्वारा प्रोत्साहितं करिष्यते।
5. शैक्षणिक-योग्यतानां वितरण-प्रसङ्गेषु, श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालय: क्रेडिट इत्यर्जिताङ्कानां विषये समयावधि-विषये च विश्वविद्यालयानुदानायोगेन अथ वा व्यावसायिक मानक-निर्धारक-संस्थया, यथाप्रकरणं, समये समये निर्धारितानां मानदण्डानां दिङ्निर्देशानां च पालनं करिष्यति। :

अत्रैक: समयो वर्तते यत्  समयावधे: विषये, अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्क-कोषीय-सुविधाया: अन्तर्गतं शैक्षणिक-योग्यता-प्राप्तकर्ता छात्र:, निर्धारितानां क्रेडिट इत्यर्जिताङ्कानां समर्जनस्य अनन्तरं, अधिकतमम् एक-सत्रस्य शैथिल्यस्य विशेषलाभम् अभिस्वीकर्तुं शक्नोति, तत्रापि यदि पाठ्यक्रमस्य कार्यक्रमस्य वा अवधि: वर्ष-द्वय-परिमित: तदधिको वा भवेत् (चतु: सत्रात्मक: तदधिको वा) ।

6. श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालय: तस्य पाठ्यक्रमस्य क्रेडिट इत्यर्जिताङ्कानाम् आधारे स्वीय-पाठ्यक्रम-शुल्कं विनिश्चेतुम् अर्हति यदर्थं छात्र: नामाङ्कित: अस्ति ।

7. श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालय एतेषां विनियमानाम् अन्तर्गतम् एक-योग्य-संस्थान-रूपेण पञ्जीकरणस्य कृते शुल्कस्य निर्धारणं स्वीकरणं च करिष्यति, यद्धि केन्द्र प्रशासनस्य विश्वविद्यालयानुदानायोगस्य पूर्वानुमत्या साकं निर्धारितं करिष्यते, यादृशमपि प्रकरणं भवेत्।

9. **विश्वविद्यालयै: ए.बी.सीत्यनेन च निभालनं**, **समर्थनं गुणवत्ताश्वासनञ्च।-**

1. एतद् पञ्जीकृतोच्च-शिक्षा-संस्थानानाम् उत्तरदायित्वं भविष्यति यत् तानि संस्थानानि विश्वविद्यालय-स्तरे तत्सम्बद्ध-स्वायत्त महाविद्यालयानां स्तरे अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्क-कोषीय-कार्यक्रमस्य विकासस्य सञ्चालनस्य च निरीक्षणं कुर्यात्।
2. श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालय: अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्क-सुविधा-निष्पादनस्य गुणवत्तायां परिष्कारं अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्क-कोषीय-कार्यक्रमस्य-सहयोगेन समग्रां बहुविषयिणीं शिक्षां संवर्धितुं शिक्षकेभ्य: कर्मकरेभ्य: च प्रशिक्षणस्य, परामर्शस्य, अकादमिकस्य प्रशासनिकस्य ऑडिट इत्यस्य अन्येषाम् उपायानां च उपस्थापनं करिष्यति, यद् खलु संकाय-विकास-कार्यक्रमस्य गुणवत्ता-परिष्कार-कार्यक्रमस्य व्यावसायिक-विकास- कार्यक्रमस्य प्रौद्योगिकी-समावेशन-कार्यक्रमस्य च रूपे भवितुं शक्नोति।
3. पञ्जीकृत-विश्वविद्यालयस्य स्वायत्त-महाविद्यालयस्य च स्तरे अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्क-कोषीय-कार्यक्रमस्य कार्यान्वयनस्य गुणवत्ताया: आश्वासन-सम्बद्धेन विश्वविद्यालयेन स्वायत्त-महाविद्यालयेन च आन्तरिक-गुणवत्ताश्वासनानुभाग: (आईक्यूएसी) इति कस्यचिद् अन्योपयुक्त-संरचित-तन्त्रस्य माध्यमेन विकसित: करिष्यते यथा श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयेन निर्धारितः भविष्यति।
4. श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालय: प्रतिवर्षं स्वीये वेबसाइट इति वेब-फलके अकादमिक बैंक ऑफ क्रेडिट्स इत्यर्जिताङ्क-तुलनायां निज-गतिविधीनां विवरणं,

युगपदेव गुणवत्ताश्वासनानाम्, गुणवत्तानिर्वाहानां गुणवत्तावर्धनस्य च कृते विहितानाम् उपायानाम्  अध्यारोहणपूर्वकं प्रदर्शनं करिष्यति।

5. छात्राणां समस्यानां/निवेदनानां निदानस्य सम्बोधनार्थं केन्द्रसर्वकारस्य /विश्वविद्यालयानुदानायोगस्य/ अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्क-स्तरे श्री-लाल-बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालये एकम् अकादमिक बैंक ऑफ क्रेडिट-इत्यस्य  समस्या-शङ्का-निवारण तन्त्रं भविष्यति।

10. **उल्लङ्घनस्य परिणामः .-**

यदा एकं पञ्जीकृतोच्च-शिक्षा-संस्थानम्  एतेषां विनियमानाम् अन्तर्गतम् निर्धारित-समयानाम् आवश्यकतानां च संपूरणे विफलीभवति तदा विश्वविद्यालयानुदानायोगः, वादश्रवणस्य उचितावसरस्य प्रदानानन्तरं संस्थानाय विश्वविद्यालयानुदानायोग-द्वारा निर्धारित-समयावधेः अन्तर्गतम् न्यूनतायाः दूरीकरणार्थम् अनुदेशं दातुं शक्नोति। अथ च उच्च-शिक्षा-संस्थानस्य पक्षतः तद्विधाने वैफल्यं  गते सति , अकादमिक बैंक ऑफ क्रेडिट इत्यर्जिताङ्क-कोष-तः एतादृशस्य संस्थानस्य पञ्जीकरणं निरस्तीकर्तुं शक्नोति एतद् अतिरिच्य, अधिनियमस्य अन्तर्गतम् अनुदान-प्रदानमपि  अवरोद्द्धुं प्रभवति, यत्र एतादृशम् अनुदानं संस्थानैः स्वीक्रियमाणमस्ति।

11. **व्याख्या : -**

एतेषां विनियमानां व्याख्यायाः विषये कश्चिदपि प्रश्नः विश्वविद्यालयानुदानायोद्वारा निर्धारयिष्यते। अथ च तस्यैव निर्णयः अस्मिन् प्रकरणे अन्तिमः  बाध्यकरः च भविष्यति।